गोत्रप्रवरगणना

भृगुकाण्डम्

मञ्जर्युक्ता गोत्रप्रवरकाण्डविषयानुक्रमणिका

तत्र कल्पसूत्रपुराणस्मृतिकारैः एकेनैव क्रमेण गोत्रप्रवरकाण्डानि उपदिष्टानि । येनैव क्रमेण तान्युपदिष्टानि तेनैव क्रमेण तानि वक्ष्यमाणानि भूदेवानामबहुश्रुतानामुपकाराय सुखग्रहणाय च अनुक्रमिष्यामः ।

आदितस्तावद्गोत्रप्रवरोपदेशकर्तव्यताहेतुसंदर्भगर्भाणि परिभाषासूत्रकाण्डान्युपदिष्टानि, तेषु च गोत्रप्रवरतत्संख्याविधिपराः प्रत्यक्षश्रुतयः तैत्तिरीयाः शाखान्तरीयाश्च ।

परिभाषासूत्रकाण्डेभ्योऽनन्तरं भृगूणां गोत्रप्रवरतत्संख्योपदेशपराणि सूत्रकाण्डान्युपदिष्टानि । ते वत्सा विदा आर्ष्टिषेणा यस्काः शुनका मित्रयुवा वैन्या इत्येवमाद्या गोत्रगणा उपदिष्टाः । प्रतिगणं च प्रवराः तत्संख्याश्चोपदिष्टाः । वत्सार्ष्टिषेणविदानां त्रयाणां गणानां परस्परं स्वे स्वे गणे चाविवाहश्चोपदिष्टः । यस्कादीनां वैन्यान्तानां स्वं स्वं गणं वर्जयित्वा परस्परं च पूर्वोक्तैः वक्ष्यमाणैश्च सर्वैः सह विवाह उपदिष्टः ।

भृगुसूत्रकाण्डेभ्योऽनन्तरं आङ्गिरसानां गोत्रप्रवरोपदेशपराणि सूत्रकाण्डानि त्रिविधान्युपदिष्टानि— गौतमानां गोत्रप्रवरोपदेशपराणि सूत्राणि, तदनन्तरं भरद्वाजगोत्रप्रवरोपदेशपराणि सूत्रकाण्डानि, तदनन्तरं केवलाङ्गिरसानां प्रवरोपदेशपराणि काण्डानि । तत्र गौतमसूत्रकाण्डेषु आयास्या गौतमा औचथ्या गौतमा औषिजा गौतमा राहूगणा गौतमाः सोमराजकयो गौतमा वामदेवा गौतमा बृहदुक्था गौतमा इति बहुभेदा गौतमगणाः, प्रतिगणं च प्रवरास्तत्संख्याश्चोपदिष्टाः । गौतमानां सर्वेषामविवाहश्चोपदिष्टः ।

गौतमसूत्रकाण्डेभ्योऽनन्तरं भरद्वाजगोत्रसूत्रकाण्डानि । तेषु च केवलभरद्वाजाः शुङ्गशैशिरयो द्व्यामुष्यायणा ऋक्षाः कपयो गर्गा इत्येवमादयो प्रतिगणं च प्रवरास्तत्संख्याश्चोपदिष्टाः भरद्वाजगणानां सर्वेषां परस्परमविवाहश्चोपदिष्टः ।

भरद्वाजगणेभ्योऽनन्तरं केवलाङ्गिरसानां प्रवरोपदेशपराणि सूत्रकाण्डान्युपदिष्टानि । तेषु च हरितकुत्सकण्वरथीतरमुद्गलसंकृतिविष्णुवृद्धादयो गणाः, प्रतिगणं च प्रवरास्तत्संख्याश्चोपदिष्टाः । तेषु च हरितकुत्सानां परस्परमविवाहः, कण्वादीनां परस्परं विवाहश्चोपदिष्टः ।

अतः परमत्रीणां गोत्रप्रवरोपदेशपराणि सूत्रकाण्डान्युपदिष्टानि । तेषु केवलात्रयो वाग्भूतका गविष्ठिरा अतिथयः पुत्रिकापुत्राश्चेत्यादयो गोत्रगणाः, प्रतिगणं च प्रवरा उपदिष्टाः । अत्रिगणानां सर्वेषां परस्परमविवाहश्चोपदिष्टः ।

अत्रिगणानन्तरं विश्वामित्रगोत्रप्रवरोपदेशपराणि सूत्रकाण्डान्युपदिष्टानि । तेषु च देवराता रौक्षका लोहका लोहिताः श्रौमताः कता धनञ्जया अघमर्षणाः पूरणा इन्द्रकौशिका आजायना रेवणा इत्याद्या गणाः, प्रतिगणं च प्रवरास्तत्संख्याश्चोपदिष्टाः । विश्वामित्रगणानां सर्वेषां परस्परमविवाहश्चोपदिष्टः ।

तदनन्तरं काश्यपानां गोत्रप्रवरोपदेशपराणि सूत्रकाण्डान्युपदिष्टानि । तेषु च निध्रुवा रेभाः शाण्डिला लौगाक्षा इत्याद्या गणाः, प्रतिगणं च प्रवरास्तत्संख्याश्चोपदिष्टाः । कश्यपगणानां सर्वेषां परस्परमविवाहश्चोपदिष्टः ।

तदनन्तरं वसिष्ठानां गोत्रप्रवरोपदेशपराणि सूत्रकाण्डान्युपदिष्टानि । तेषु च केवलवसिष्ठा उपमन्यवः पराशराः कुण्डिनाः संकृतयश्चेति च गणाः, प्रतिगणं च प्रवरास्तत्संख्याश्चोपदिष्टाः । वसिष्ठगणानां सर्वेषां परस्परमविवाह-

तदनन्तरमगस्तीनां गोत्रप्रवरोपदेशपराणि सूत्रकाण्डान्युपदिष्टानि । तेषु च इध्मवाहाः साम्भवाहाः सोमवाहा यज्ञवाहा माहेन्द्राः पौर्णमासाश्चेति गोत्रगणाः, प्रतिगणं च प्रवरास्तत्संख्याश्चोपदिष्टाः । अगस्तिगणानां सर्वेषां परस्परमविवाहश्चोपदिष्टः ।

तदनन्तरं क्षत्रियाणामात्मीयप्रवरः पुरोहितप्रवरश्चोपदिष्टः । पुरोहितगोत्रैः पुरोहितप्रवरैश्च सह क्षत्रियाणामविवाहो नोपदिष्टः, प्राप्त्यभावात् ।

तदनन्तरं वैश्यानां क्षत्रियवत् आत्मीयप्रवरः पुरोहितप्रवरश्चोपदिष्टः ।

तदनन्तरं सार्ववर्णिकमानवप्रवरोपदेशपराणि सूत्रकाण्डान्युपदिष्टानि । तेषु च त्रयाणां वर्णानामविशेषेण एकार्षेयो मानवः प्रवर उक्तः ।

सर्वान्ते च समानगोत्रसमानप्रवरादियाथार्थ्यविदां प्रवराध्यायाध्ययनस्य च ब्रह्मविदां वेदाध्ययनस्येव ब्रह्मलोकादिफलप्राप्त्युपदेशपराणि शास्त्रसमाप्तिसूत्रकाण्डान्युपदिष्टानि । तेषु चोपदिष्टेषु सत्सु पर्यवसिताः प्रवराध्यायाः ।

अस्यां च काण्डानुक्रमण्यां परिगणितेषु गणेषु एकैकस्मिन् गणे यावन्ति गोत्राणि यन्नामकानि यत्क्रमकानि चान्तर्भवन्ति विद्यन्ते तानि सर्वाणि सूत्रपाठक्रमानुसारेणैव परिगणितानि ज्ञातव्यानीति । तथा प्रवरसंख्या पञ्चार्षेयत्र्यार्षेयद्व्यार्षेयैकार्षेयविभागे सूत्रपाठक्रमानुसारेणैव ज्ञातव्या । इति वक्ष्यमाणं सर्वमनुक्रान्तं जिज्ञासानिवृत्तये सुखग्रहणाय च । गोप्र. २–४

बौधायनश्रौतसूत्रम् ।

वत्साः

भृगूणामादितो व्याख्यास्यामः–

१ (वात्स्याः) २ मार्कण्डेयाः ३ माण्डूकेयाः ४ माण्डव्याः ५ कांसयः ६ आलेखनाः ७ दार्भायणाः ८ शार्कराक्ष्याः ९ दैवतायनाः १० शौनकायनाः ११ माधुकेयाः १२ पार्पिकाः १३ साङ्काः १४ प्रान्तायनाः १५ पैलाः १६ पैङ्गलायनाः १७ दाभ्रेषयः १८ बाह्यकयः १९ वैश्वानरयः २० वैहीनरयः २१ विरोहिताः २२ बार्ह्याः २३ गौष्ठायनाः २४ यष्टेपयः २५ काशकृत्स्नाः २६ वाग्भूतयाः २७ ऋतभागाः २८ ऐतिशायनाः

---

(१) बौश्रौप्र. ; गोप्र. २२ ; संप्र. ६१६–६१७ ; संम. ५५–५६; प्रद. ११० ; संकौ. १८३ ; बाल. १५३ (पृ. १८३); संर. ४२७–४२८.

१ प्रद. जामदग्न्या वत्साः ; बाल. वत्सः ; संर. वत्साः .

३ बौश्रौप्र. माण्डूकाः .

४ संप्र. संम. 'माण्डूकेयाः' इत्यस्य पूर्वम् ।

५ प्रद. बाल. संर. कांसियाः ; संप्र. काशेयाः, कांसयः ; संम. काशेयाः, कांसेयाः ; बाल. माण्डूकः, कामः, काक्षेयः इत्यधिकम् ।

८ बौश्रौप्र. गोप्र. संप्र. संम. प्रद. बाल. शार्कराक्षाः .

९ गोप्र. देवतायनाः ; संप्र. दैवन्तायनाः ; प्रद. देवतापनः ; संम. दैवत्यापनाः .

११ बौश्रौप्र. माण्डूकेयाः. अन्यग्रन्थेषु माधूकेयाः इति । शतपथब्राह्मणानुसारेण प्रा. जॉन ब्रौमहोदयेन सूचितः पाठोऽयम् ।

१२ प्रद. पाष्णिकः ; बाल. वार्षिकः .

१३ गोप्र. सांप्रभायनाः ; संप्र. साङ्काः , कांसा इत्यपि क्वचित् ; संम. कांसाः ; बाल. साम्बः ; संर. साकाः .

१४ संप्र. प्रद. प्रभायनाः ; संम. प्राप्तायनाः ; संकौ. संर. प्रात्तायनाः ; बाल. प्राक्तनायनः .

१६ संम. पैङ्गलानादः ; बाल. पिङ्गलायनः .

१७ गोप्र. संप्र. प्रद. दाभ्रेपकयः ; संम. प्रेपयः ; संकौ. बाल. दाभ्रेपकाः ; संर. दार्भ्रेपकयः .

१८ गोप्र. वाह्यकयः ; प्रद. वाह्याकिः .

१९ बाल. वैश्वाहीनरिः .

२१ संकौ. संर. वैरोहिताः ; प्रद. विलोहितः .

२२ गोप्र. संम. संकौ. संर. बाह्याः ; संप्र. बाह्याः, भ्रष्टाः इत्यपि ; बाल. वाहकः . 'बार्ह्याः' इत्यस्यानन्तरं संकौ. भ्रष्टाः ; बाल. बर्हिः, वभ्रः ; संर. भ्राष्टाः इत्यधिकम् ।

२३ बौश्रौप्र. गौष्ठायणाः ; गोप्र. गौब्जायनाः ; संप्र. गौब्जायणाः ; संम. गोष्ठायणाः ; प्रद. संकौ. बाल. संर. गोष्ठायनाः .

२४ बौश्रौप्र. ऐष्टेषयः ; गोप्र. संप्र. संम. ष्टैकयः ; प्रद. सेषिः ; संकौ. संर. टीकयः ; बाल. टिकिः .

२६ गोप्र. संप्र. संम. संकौ. बाल. वाद्भूतकाः ; प्रद. संर. वाद्भुतकाः .

२७ संप्र. संम. प्रद. संकौ. संर. कृतभागाः .

२९ जानायनाः ३० पाणिनिः ३१ वाल्मिकिः ३२ स्थौलपिण्डयः ३३ शैखावताः ३४ जिहीतयः ३५ सावर्णिः ३६ वाकायनाः ३७ बालायनाः ३८ सौकृतयः ३९ मण्डवित् ४० सौविष्टयः ४१ हस्त्यग्नयः ४२ शौद्धकयः ४३ वैकर्णाः ४४ द्रौपजिह्वयः ४५ औरशयः ४६ काम्बलोदरयः ४७ काठोरकृत् ४८ वैहलयः ४९ विरूपाक्षाः ५० वृकाश्वाः ५१ उच्चैर्मन्यवः ५२ दैवमत्याः ५३ आर्कायणाः ५४ मार्कायणाः ५५ काह्वायनाः ५६ वायवायनिनः ५७ शाङ्गरवाः ५८ कारबवाः ५९ चान्द्रमसाः ६० गाङ्गेयाः ६१ आनूपेयाः ६२ याज्ञेयाः ६३ जाबालिः ६४ पारिमण्डलिः ६५ बाहुमित्रायणाः ६६ आपिशलयः ६७ वैष्टपुरेयाः

२९ **बाल.** तापनायनः ; **संर.** ज्ञानायनाः .

३० **मंर.** पाणिनयः .

३२ **संर.** स्थौलपिण्डायनः .

३३ **गोप्र. संप्र.** सेपानवाः ; **प्रद्. संकौ.** सौपातवाः ; **बाल.** सौधानकिः ; **मंर.** सैवानवाः .

३४ **बाल.** जैहीतिः .

३५ **मंप्र.** सावर्णिकायनाः .

३७ **गोप्र. संप्र. बाल. संर.** वालायनाः ; **प्रद्.** वलायनाः.

३८ **प्रद्. बाल.** मुकृतिः .

३९ **गोप्र. प्रद्. मंकौ. मंर.** मण्डवः. **बाल.** 'मण्डवित्' इत्यस्य पूर्व धूतवः इत्यधिकम् ।

४० **संम.** सौविस्तयः ; **प्रद्.** मुविष्ठि ; **मंकौ.** सोविष्टयः ; **बाल.** सौविष्ठिः ; **मंर.** सौविष्वयः .

४१ **बौश्रौप्र.** हस्त्याग्नयः ; **गोप्र. प्रद्. संकौ. बाल.** हस्ताग्नयः ; **मंप्र.** हस्त्यग्नयः, हस्ताग्नयः ; **संम.** हस्तग्नयः, हस्ताग्नयः ; **संर.** हस्ताग्नयः .

४२ **गोप्र.** सौद्धकयः ; **बाल.** सैहकः. 'शौद्धकयः' इत्यस्यानन्तरं **संप्र. संकौ.** शौद्धाकयः ; **संम. प्रद्.** सौद्धाकयः ; **संर.** शौर्द्धकयः इत्यधिकम् ।

४३ **गोप्र. संप्र. संकौ.** वैकर्ण्याः ; **संम.** वैकर्णयः .

४४ **बौश्रौप्र.** औपजिह्वयः ; **गोप्र. संप्र. संम. प्रद्.** द्रोणजिह्वयः ; **संकौ. संर.** द्रोणकजिह्वयः ; **बाल.** धोकजिह्वः ; **जेबी.** द्रौपजिह्वाः .

४५ **गोप्र.** अरसयः ; **संप्र. संम. प्रद्. संकौ. संर.** औरसयः ; **बाल.** औरसः .

४६ **गोप्र. संप्र. संम.** काम्बरोदरयः ; **संकौ. संर.** कम्बलोदरयः ; **बाल.** कम्बलोदरः .

४७ **गोप्र.** काम्बोरकृत् ; **संप्र.** कम्बोरकृत् ; **संम.** कण्ठोरकृत् ; **प्रद्.** कठोरकृत ; **संकौ. संर.** वाकारकृतः ; **बाल.** कठोरकृत् .

४८ **बौश्रौप्र. गोप्र. मंप्र. प्रद्.** वैहलिः ; **संम.** वैहल. 'वैहलयः' इत्यस्यानन्तर **संकौ. मंर.** साङ्क्रवाः, कारतम्बराः, कारवाः, तामसाः ; **बाल.** साङ्करवः, काम्नवरः, कारवः, तामसः इत्यधिकम् ।

५० **संम.** भिकाश्वाः ; **प्रद्.** वृवाश्वः ; **बाल.** वृक्षाश्वः .

५२ **गोप्र. मंप्र. प्रद्. संकौ. मंर.** द्वैमत्याः ; **संम.** वैमत्याः ; **बाल.** द्वैमन्यः .

५३ **गोप्र.** अर्यायणाः ; **संप्र. संम. प्रद्. संकौ. मंर.** आर्यायणाः ; **बाल.** आर्यापणः .

५४ **मंकौ.** यार्कायणाः ; **मंर.** पाकायणाः .

५५ **प्रद्.** काह्वायणः .

५६ **गोप्र.** वायवाः, वयनीनः ; **मंप्र.** वायवाः, वायनीनः ; **संम.** वायवाः, वायानिनः ; **प्रद्.** वायवः, वायनिः ; **संकौ.** वायनयः, वायनिनः ; **बाल.** वायनः, कायनिः ; **मंर.** वानयश्चायनिनः. 'वायवायनिनः' इत्यस्यानन्तरं **संप्र. संम.** दैवमत्याः, आर्कयणाः, काङ्कायनाः ; **प्रद्.** दैवमत्यः, आर्कायणः, काङ्कायनः ; **बाल.** बाह्वायनः, दैवमन्यः, आर्कायणः, काङ्कायनः इत्यधिकम् ।

५७ **बौश्रौप्र.** शाङ्करवाः ; **गोप्र.** शङ्करवाः ; **संम.** शाङ्करवः .

५८ **बौश्रौप्र.** कारबः ; **गोप्र.** खण्टवः ; **मंप्र.** करवचन्द्रमसः ; **प्रद्.** करबचन्द्रमसः .

५९ **गोप्र.** चान्द्रमसः ; **बाल.** चन्द्रमसः . उपरितनं नाम द्रष्टव्यम् ।

६१ **बौश्रौप्र.** अनुपेयाः ; **गोप्र. प्रद्.** नोपेयाः ; **संप्र. संकौ.** नौपेयाः ; **मंम.** तोयेयाः ; **बाल.** गौपयः ; **संर.** नौधेयाः .

६२ **बौश्रौप्र. प्रद्. बाल.** याजिकाः ; **गोप्र.** याज्ञीयाः ; **संप्र. संम. संकौ. मंर.** याज्ञियाः. 'याज्ञेयाः' इत्यस्य पूर्वं **बाल.** तौपेयः इत्यधिकम् ।

६३ **संम.** यावतिः .

६४ **प्रद्. बाल.** इति ग्रन्थद्वये एव इदं नाम समुपलभ्यते

६६ **प्रद्.** आपिशालिः .

६७ **संम.** वैष्टपरेयाः ; **प्रद्.** विष्टपुरिः ; **संकौ.** वैष्टपुरय. ; **बाल.** विष्टूरिः ; **संर.** वैश्वपुरयः .

६८ लोहितायनाः ६९ उष्ट्राक्षाः ७० नाडायनाः ७१ शारद्वतायनाः ७२ राजितवाहाः ७३ वत्साः ७४ वात्स्यायनाः इत्येते वत्साः। तेषां पञ्चार्षेयः प्रवरो भवति। भार्गव-च्यावन-आप्नवान-और्व-जामदग्न्य- इति होता। जमदग्निवद्-ऊर्ववद्-अप्नवानवत्-च्यवनवद्-भृगुवद्-इत्यध्वर्युः॥

विदाः

१ [1]विदाः-शैलाः २ अवटाः-शैलाः ३ प्राचीनयोग्याः ४ अभयजाताः ५ काण्डरथयः ६ वैदभृताः ७ पुलस्तयः ८ आर्कायणाः ९ मार्कायणाः १० नाष्ट्रायणाः ११ क्रौश्चायनाः १२ भौञ्जायनाः १३ जामलायनाः इत्येते विदाः। तेषां पञ्चार्षेयः प्रवरो भवति। भार्गव-च्यावन-आप्नवान-और्व- वैद- इति होता। विदवद्-ऊर्ववद्-अप्नवानवत्- च्यवनवद्-भृगुवद्- इत्यध्वर्युः॥

आर्ष्टिषेणाः

१ आर्ष्टिषेणाः २ नैरथयः ३ ग्राम्यायणयः ४ काण्वायनाः ५ चान्द्रायणाः ६ प्रौढकलायनाः ७ सिद्धाः ८ सुमनायनाः ९ गौराम्भिः १० आम्भिः इत्येत आर्ष्टिषेणाः। तेषां पञ्चार्षेयः प्रवरो भवति। भार्गव-च्यावन-आप्नवान-आर्ष्टिषेण-आनूप-इति होता। अनूपवद्-ऋष्टिषेणवद्-अप्नवानवत्-च्यवनवद्-भृगुवद्-इत्यध्वर्युः। वत्साः विदाः आर्ष्टिषेणाः इत्येतेषामविवाहः। एते पञ्चावत्तिनः॥

---

६८ **जेबी.** लौहितायनाः.

६९ **बाल.** उष्ट्रान्तः.

७० **गोप्र. प्रद.** मालायनः; **संप्र. संम. संकौ. संर.** मालायनाः; **बाल.** माशायनः.

७२ **गोप्र. संप्र. प्रद. बाल.** राजतवाहाः; **संकौ. संर.** रजनवाहाः.

७३ **गोप्र. संप्र.** वासाः; **संम.** वासाः, वात्साः इति नामद्वयम्; **प्रद.** वासः, वत्सः इति नामद्वयम्; **बाल.** श्रीवत्सः.

७४ **प्रद.** वात्सायनः; **संर.** वात्सायनाः.

(१) **बौश्रौप्र., गोप्र.** २३; **संप्र.** ६१८-६१९; **संम.** ५६; **प्रद.** १११; **संकौ.** १८४; **संर.** ४२९.

१ **संकौ. जेबी.** बिदाः-शैलाः.

२ **संम.** अवयः-शौलाः; **प्रद. संकौ. संर.** अवटाः.

४ **गोप्र.** अभयदाताः; **संप्र. संम. संकौ. संर.** अभयदानाः; **प्रद.** अभयदाता.

५ **संर.** काण्डरथाः.

६ **गोप्र.** वैनभृतयः; **संप्र. संम.** वैतभृताः; **प्रद. संकौ. संर.** वैनभृतः.

७ **संकौ. संर.** पुलस्त्यः.

८ **संप्र.** (०).

९ निबन्धग्रन्थेषु नोपलभ्यते। 'आर्कायणाः' इत्यस्यानन्तरं **गोप्र. संप्र.** ताम्रायणाः; **संम.** तान्त्रायणाः; **संकौ. संर.** ताम्रायणः इत्यधिकम्।

१० **संप्र.** नाष्ट्रयणाः; **प्रद.** ताष्ट्रायणः; **संकौ. संर.** नाष्ट्रायणः; **गोप्र. संम.** (०).

११ **संप्र.** क्रौञ्चायणाः; **प्रद.** क्रौयनः; **संकौ.** क्रौश्चायसाः; **संर.** क्रौन्चायणः; **संम.** (०).

१२ **बौश्रौप्र.** भुञ्जायनाः; **संप्र. संकौ. संर.** भृञ्जायनाः; **संम.** (०).

१३ **गोप्र.** लामलाः; **संप्र. संम.** कामलाः; **प्रद. संकौ. संर.** कामलः.

(१) **बौश्रौप्र.; गोप्र.** २३; **संप्र.** ६१९; **संम.** ५५; **प्रद.** ११२; **संकौ.** १८४; **संर.** ४३०.

२ **संकौ. संर.** नैर्ऋथयः.

३ **बौश्रौप्र.** ग्राम्यायणाः; **गोप्र.** याम्यायनयः; **प्रद.** ग्राम्यायणः.

४ **बौश्रौप्र.** काण्वयः; **गोप्र.** काणायनाः; **संप्र.** क्वचित् कार्णायनाः क्वचित् कात्यायनाः इति वा पाठः; **संम. प्रद.** कात्यायनाः; **संकौ.** कार्णायणाः; **संर.** कार्णायनाः.

५ **गोप्र.** (०).

६ **गोप्र.** (०); **संप्र. संर.** पौटकलायनाः; **प्रद.** पौठिकलायनः; **संम. संकौ.** पैटकलायनाः.

७ **गोप्र.** (०); **प्रद.** सिद्धः.

८ **गोप्र.** (०); **प्रद.** ससुनायनः.

९ **गोप्र.** गौराम्बिः; **संकौ. संर.** गौराभिः.

१० **गोप्र. संकौ.** राभिः; **संप्र. संर.** (०); **प्रद.** राम्भिः.

यस्काः

१ [1]यस्काः २ मौनः ३ मूकः ४ वाधूलः ५ वर्षपुष्पः ६ बालेयः ७ राजिततायिनः ८ दुर्दिनः ९ भास्करः १० जैवन्तायनः ११ वार्कलेयः १२ माध्यमेयाः १३ वाशयः १४ कौशाम्बेयाः १५ कौटिल्याः १६ सत्यकः १७ चित्रसेनाः १८ भागन्तयः १९ वार्काश्वकयः २० औक्थाः २१ और्गचितयः २२ भागुरित्थयः इत्येते यस्काः। तेषां त्र्यार्षेयः प्रवरो भवति। भार्गव-वैतहव्य-सावेतस-इति होता। सवेतोवद्-वीतहव्यवद्-भृगुवद्-इत्यध्वर्युः॥

(१) बौश्रौप्र. ; गोप्र. २३-२४; संप्र. ६२० ; संम. ५५ ; प्रद. ११३ ; संकौ. १८५ ; संर. ४२९.

१ संप्र. यस्कः ; संर. वीतहव्या यास्काः.

३ संर. मौकः.

४ गोप्र. प्रद. संकौ. वाधुलः.

५ गोप्र. संप्र. प्रद. वर्षपुष्यः.

६ गोप्र. मातलयः ; संप्र. प्रद. संकौ. भागलेयः ; संम. मातूलयः ; संर. भागलेपः.

७ संप्र. सका. संर. भागविज्ञेयः ; संम. राजतैनः ; प्रद. राजितापिः, अस्यानन्तरं रोदरिनः भागविज्ञेयः इत्यधिकम्।

८ संकौ. दुर्निदः.

१० बौश्रौप्र. दैवन्तायनः ; गोप्र. संकौ. दैवतायनः ; संप्र. देवन्तायनः ; संम. दैवतायनः, जैवन्तायनः इत्यपि ; प्रद. दैवन्तायनः, अस्यानन्तरं जैवतायनः इत्यधिकम् ; संर. दैवजायनः.

११ बौश्रौप्र. बाष्कलेयः ; गोप्र. संम. वाकलयः ; संप्र. वार्कलयः ; प्रद. वार्करेलयः.

१२ प्रद. मध्यमेयः.

१३ गोप्र. संप्र. संम. प्रद. संकौ. संर. वासयः.

१५ संकौ. क्रौविल्याः ; संर. क्रोविल्याः.

१६ संप्र. संकौ. सत्यकयः ; संम. सात्यकेयाः ; प्रद. सात्यकिः ; संर. सत्यकयाः.

१८ गोप्र. संप्र. संकौ. संर. (०).

१९ गोप्र. संप्र. संकौ. संर. (०) ; संम. तार्काश्वकेयाः ; प्रद. वाकाश्वकिः.

२० गोप्र. संप्र. संकौ. संर. (०) ; संम. औतथाः.

२१ बौश्रौप्र. औग्रचितयः ; गोप्र. संप्र. संकौ. संर. (०) ; संम. और्गुविश्रतयः ; प्रद. उर्गविश्रिः.

२२ गोप्र. भागुरिर्नूपः ; संप्र. भागुरिकयः ; संम. भागुरिः ; प्रद. भागुरिः, नूपः ; संकौ. भागुरिः, छयाः ; संर. भागुरिछयः. इत्येते यस्काः। वीतहव्याः इति केचित्।

मित्रयुवः

१ [1]मित्रयुवः २ रौष्ट्यायनाः ३ शायण्डिनाः ४ सापिण्डनाः ५ सुराम्भिनाः ६ माल्याः ७ यावाल्याः ८ महावाल्याः ९ तार्क्ष्यायणाः १० औरुक्ष्यायणाः ११ वाजायनाः १२ मादाघयः

(१) बौश्रौप्र. ; गोप्र. २४ ; संप्र. ६२१ ; संम. ५५ ; प्रद. ११३ ; संकौ. १८५ ; संर. ४३०.

१ संर. वाध्न्यश्वाः. प्रा. जान ब्रौमहोदयेन मित्रयुवः इत्यत्र मित्रयूनां इति पाठः स्वीकृतः। तन्मते मित्रयुवः इति बहुवचनान्तं रूपं व्याकरणशास्त्रदृष्ट्या अशुद्धम्। मित्रयवः इति आवश्यकम्। अस्माभिस्तु सर्वेषु निबन्धग्रन्थेषु मित्रयुवः इति पठितत्वात् तदेव स्वीकृतम्।

२ गोप्र. रौष्ट्यायनः ; संम. रौक्मायणाः, रोष्ट्यायनाः रौक्यायनाः ; प्रद. रौक्यायणः ; संकौ. रैष्णायनाः ; संर. रैष्ट्यानाः ; जेबी. रौष्ट्यायननाम्. प्रद. 'रौष्ट्यायनाः' इत्यस्यानन्तरं नाशार्यञ्जनः, गेष्टायनः, रौक्षायनः इत्यधिकम्।

३ गोप्र. संप्र. प्रद. संकौ. संर. (०) ; संम. शायजनाः ; जेबी. शायण्डीनाम्.

४ गोप्र. प्रद. सापिण्डिनः ; संम. सखण्डिनाः ; संकौ. संर. सापिण्डिनाः ; जेबी. (०).

५ गोप्र. पुराभिनायाः ; संप्र. संम. संकौ. संर. सुरभिनेयाः ; प्रद. सुरभितयः ; जेबी. सुराम्भीनाम्.

६ संप्र. माल्यायाः ; संम. माल्यादयाः.

७ बौश्रौप्र. बाल्याः ; संप्र. संम. वाल्यायाः, बाल्यायाः ; संकौ. संर. (०).

८ बौश्रौप्र. संप्र. संकौ. महाबाल्याः.

९ 'तार्क्ष्यायणाः' इत्यस्यानन्तरं संप्र. रौक्यायणाः इत्यधिकम्।

१० गोप्र. संप्र. उक्षायणाः ; संम. औरक्षायणाः, उक्षायणाः इत्यपि ; प्रद. औरुक्षायणः, उक्षायणः इत्यपि ; संकौ. संर. (०).

११ गोप्र. ओजायनाः ; प्रद. वाञ्जायनः ; संकौ. संर. (०).

१२ गोप्र. माजाधयः ; प्रद. माञाधिः ; संप्र. संकौ. संर. (०).

१३ कैतवायनाः इत्येते मित्रयुवः । तेषां त्र्यार्षेयः प्रवरो भवति । भार्गव-वाध्र्यश्व-दैवोदास-इति होता । दिवोदासवद्-वध्र्यश्ववद्-भृगुवद्-इत्यध्वर्युः ॥

वैन्याः

१ [1]वैन्याः २ पार्थाः ३ बाष्कलाः ४ श्यैताः । तेषां त्र्यार्षेयः प्रवरो भवति । भार्गव-वैन्य-पार्थ-इति होता । पृथुवद्-वेनवद्-भृगुवद्-इत्यध्वर्युः ॥

शुनकाः

१ शुनकाः २ गार्त्समदाः ३ यज्ञपयः ४ सौगन्धयः ५ खार्दमायनाः ६ गाङ्गायनाः ७ मत्स्यगन्धाः ८ चौक्षाः ९ श्रोत्रियाः १० तैत्तिरीयाः ११ पल्पूला इत्येते शुनकाः । तेषामेकार्षेयः प्रवरो भवति । शौनक-इति होता । शुनकवद्-इत्यध्वर्युः । गार्त्समद-इति होता । गृत्समदवद्-इत्यध्वर्युरिति वा ॥

आपस्तम्बश्रौतसूत्रम्

वत्साः

भृगूणामेवाग्रे व्याख्यास्यामः- जामदग्न्या(ग्ना) वत्साः । तेषां पञ्चार्षेयः प्रवरो भवति । भार्गव-च्यावन-आप्नवान-और्व-जामदग्न्य-इति । जमदग्निवद्- ऊर्ववद्- अप्नवानवद्- च्यवनवद्-भृगुवद्-इति । त्र्यार्षेयमु हैके भार्गव-और्व-जामदग्न्य- इति । जमदग्निवद्- ऊर्ववद्- भृगुवद्- इति । एष एवाविकृतः । सावर्णि- जीवन्ति- जामाल्य- ऐतिशायन- वैरोहित्य- अवट- मण्डु- प्राचीनयोग्यानाम् ॥

भृगूणामेवेति । प्रवरव्याख्या प्रतिज्ञाता । येषां प्रवरा वक्तव्यास्तेषां मध्ये भृगूणामेव भृगोः संततिजातानामेव ब्राह्मणानामग्रे प्रथमं व्याख्यास्यामः । किमर्थमिदमुच्यते । वक्ष्यमाणाना वत्सप्रभृतीनां वैन्यान्तानां भृगुत्वं यथा स्यात् इति, तेन तेषां 'भृगूणां त्वा' इति यथर्ष्याधानं स्यात् इति, 'भार्गवो होता भवति' इति, 'तेषां भार्गवः प्राशितॄणामेकः स्यात्' इत्यत्र च ग्रहणमेषां स्यादिति । उक्तिक्रमादेव च सिद्धे अग्रवचनमग्र एव ये भृगवस्ते इह वक्ष्यन्ते, न द्व्यामुष्यायणत्वेन पश्चात् भृगुत्वमापन्ना इति ख्यापनार्थम् । एवमविद्यमानभृगुशब्दानां मित्रयूनां च भृगुत्वमेवेति ज्ञापनार्थम् । अथवा अग्रग्रहणं प्रथममेषां भृगुणा समाख्यानं पश्चादन्यैः ऋषिभिश्चेति ख्यापनार्थम् । तेन 'जमदग्नीनाम्' 'और्वो गौतमः' 'यथर्ष्याधानम्' 'भार्गवस्य' इत्येवमादौ तदपत्यानां ग्रहणं समाख्यानसिद्धं भवतीति । एवकारस्य तु पूर्वोक्तमेव प्रयोजनम् ।

जामदग्न्या इति । जामदग्ना भवन्ति वत्साः । तेषां पञ्चार्षेयः प्रवरो भवति । भार्गव च्यावन आप्नवान और्व जामदग्न्य इति होता प्रवृणीते, जमदग्निवद्-ऊर्ववद्-अप्नवानवत्-च्यवनवद्-भृगुवद् इति अध्वर्युः प्रवृणीते । होतुः प्रवरोऽध्वर्योः प्रवर इति वाऽध्याहारः । एवं सर्वत्र ।

त्र्यार्षेयमिति । उ हेत्यवधारणे । इति होता प्रवृणीते- भार्गव और्व जामदग्न्य इति । जमदग्निवद्-ऊर्ववद्-भृगुवद् इत्यध्वर्युः प्रवृणीते । 'अप्यजामदग्न्यो जामदग्न्यमामन्त्र्य' इत्येकवचनान्तेन प्रयोगदर्शनात् बहुवचनान्ते 'जामदग्ना वत्साः' 'जमदग्नीनां तु पञ्चावत्तम्' इति दर्शनात् शिवादिषु गर्गादिषु च पाठोऽनुमेयः । जमदग्निशब्दस्य

---

१३ **संकौ.** कैतवानयः .

(१) **बौश्रौप्र.** ; **गोप्र.** २४ ; **संप्र.** ६२१ ; **संम.** ५५ ; **प्रद.** ११३ ; **संकौ.** १८५ ; **संर.** ४२९ .

४ **बौश्रौप्र. गोप्र संम. प्रद.** (०) ; **संकौ.** श्यैनाः ; **संर.** शैताः .

(२) **बौश्रौप्र.** ९ ; **गोप्र.** २४ ; **संप्र.** ६२१ ; **प्रद.** ११३ ; **संकौ.** १८५ .

३ **प्रद.** याज्ञपिः ; **संकौ.** यज्ञपतयः .

४ **प्रद.** (०) .

६ **गोप्र.** गार्भायनाः ; **संप्र.** गार्भायणाः, भार्गायणाः इति क्वचित्, क्वचित् आङ्गायनाः इत्यपि ; **संम.** भार्गायणाः इत्यपि । **संकौ.** गार्भायणाः ; **प्रद.** गाङ्गायनः, गर्भायणः .

७ **प्रद.** मात्स्यगन्धः .

८ **गोप्र. संप्र. संम. संकौ.** (०) ; **प्रद.** स्वौजः .

९, १० **संप्र.** (०) .

११ **गोप्र. संप्र. संम. संकौ.** (०) .

(३) **आपश्रौ.** २४।५।१०-१६, २४।६।१-९ ; **गोप्र.** २५ ; **प्रद.** १११ गोत्रनामान्येव केवलं समुद्धरति , न मूलग्रन्थः.

शिवादिषु पाठाज्जामदग्नः । जमदग्निशब्दस्य गर्गादिषु पाठात् जामदग्न्यशब्दे बहुष्वपत्यप्रत्ययस्य लुक् स्यात् ।

एष एवेति । एष प्रवरोऽविकृतः स्यात् सावर्णि–जीवन्ति–जाबाल्य–ऐतिशायन–वैरोहित्य–अवट–मण्डु–प्राचीनयोग्या इत्येतेषाम्। जाबालशब्दाद्यति (?) जाबाल्याः (जाबाल्यवद्वा एव च)। एवमन्येष्वपि गोत्रप्रत्ययान्तेषु समाधिरूहितव्यः। विरोहितशब्दाद्यञि वैरोहित्याः। एवं प्राचीनयोग्याः। इह 'भृग्वङ्गिरसो भिन्नविवाहं कुर्वते न चेत्समानार्षेया बहवः' इति सर्वेषां प्रवराचार्याणां दर्शनम्। वसिष्ठानां काश्यपानां च भिन्नविवाहं गर्गा इच्छन्ति। कठानां प्रवरे चैवम्। अन्ये तेषां भिन्नविवाहं नेच्छन्ति। तत्र एतेषां त्रयाणां पक्षाणां बहूनामृषीणां समानभावादविवाहः। वत्सा बिदा आर्ष्टिषेणा एते पञ्चावत्तिनः, एतेषामविवाह इति बोधायनमतिः। कपर्दि.

आर्ष्टिषेणाः

अथार्ष्टिषेणानां पञ्चार्षेयो भार्गव–च्यावन–आप्नवान–आर्ष्टिषेण–आनूप–इति । अनूपवद्–ऋष्टिषेणवद्–अप्नवानवत्–च्यवनवद्–भृगुवद्–इति । त्र्यार्षेयमु हैके भार्गव–आर्ष्टिषेण–आनूप–इति । अनूपवद्–ऋष्टिषेणवद्–भृगुवद्–इति ॥

यस्काः (वीतहव्याः)

अथ वीतहव्याः यास्क–वाधूल–मौन–मौकाः । तेषां त्र्यार्षेयो भार्गव–वैतहव्य–सावेदस–इति । सवेदोवद्–वीतहव्यवद्–भृगुवद्–इति ॥

अथ वीतहव्यानाम् । यास्क–वाधूल–मौन–मोका इति पाठः। 'यस्कादिभ्यो गोत्रे' इति बहुषु लोपानित्यत्वात् यास्क–वाधूल इत्येवं बभूव प्रवरे पाठः। प्रवरान्त्ये तु मोक इत्येव पाठः। कपर्दि.

शुनकाः (गृत्समदाः)

अथ गृत्समदाः शुनकाः । तेषामेकार्षेयो गार्त्समद–इति होता । गृत्समदवद्–इत्यध्वर्युः ॥

प्रवृणीत इत्युभयोः शेषः। सर्वत्र एकार्षेयेषु होता वाध्र्यश्व इति वध्र्यश्ववदित्यध्वर्युः इति ब्रवीति अन्यत्र अध्याहर्तव्यप्रदर्शनार्थम्। आचार्यशैली चैषा।

कपर्दि.

मित्रयुवः (वाध्र्यश्वाः)

अथ वाध्र्यश्वाः मित्रयुवः । तेषामेकार्षेयो वाध्र्यश्व–इति होता । वध्र्यश्ववद्–इत्यध्वर्युः ॥

मित्रयुवो वाध्र्यश्वा भवन्ति । तेषामेकार्षेयः। वाध्र्यश्व इति होता, वध्र्यश्ववद् इत्यध्वर्युः।

कपर्दि.

वैन्याः (पार्थाः)

अथ वैन्याः पार्थाः । तेषां त्र्यार्षेयो भार्गव–वैन्य–पार्थ–इति । पृथुवद्–वेनवद्–भृगुवद्–इति । इमे भृगवो व्याख्याताः ॥

वैन्याः पार्थाः वृद्धिभूताः। इमे भृगवो व्याख्याताः। तेषां चतुर्णां पक्षाणां ऋषीणामसमानत्वात् अन्योन्यतश्च पूर्वेषां च सह विवाहः। कपर्दि.

सत्याषाढश्रौतसूत्रम्

वत्साः

भृगूनेवाग्रे व्याख्यास्यामः । जामदग्न्या वत्साः । तेषां पञ्चार्षेयः । भार्गव–च्यावन–आप्नवान–और्व–जामदग्न्य–इति । जमदग्निवद्–उर्ववद्–अप्नवानवत्–च्यवनवद्–भृगुवद्–इति । त्र्यार्षेयमु भार्गव–और्व–जामदग्न्य–इति । जमदग्निवद्–उर्ववद्–भृगुवद्–इति । एष एवाविकृतो जामाल्य–ऐतिशायन–विरोहित–माण्डव्य–अवट–मण्डु–बैद–रेतवाह–प्राचीनयोग्यानाम् ॥

आर्ष्टिषेणाः

अथाऽऽर्ष्टिषेणानां पञ्चार्षेयः । भार्गव–च्यावन–आप्नवान–आर्ष्टिषेण–आनूप–इति । अनूपवद्–ऋष्टिषेणवद्–अप्नवानवत्–च्यवनवद्–भृगुवद्–इति । त्र्यार्षेयमु हैके भार्गव–आर्ष्टिषेण–आनूप–इति । अनूपवद्–ऋष्टिषेणवद्–भृगुवद्–इति ॥

---

(१) सश्रौ. २१।३।७–८ ; बाल. १५३ (पृ. १८३) गोत्रनामान्येव केवलं समुद्धरति ; संर. ४१८–४१९.

यस्काः (वीतहव्याः)

अथ वीतहव्याः यास्क-वाधूल-मौन-मौक-राजतवाहाः । तेषां त्र्यार्षेयः । भार्गव-वैतहव्य-सावेदस-इति । सवेदोवद्-वीतहव्यवद्-भृगुवद्-इति ॥

वैन्याः (पार्थाः)

अथ वैन्याः पार्थाः । तेषां त्र्यार्षेयः । भार्गव-वैन्य-पार्थ-इति । पृथुवद्-वेनवद्-भृगुवद्-इति ॥

शुनकाः (गार्त्समदाः)

अथ गार्त्समदाः शुनकाः । तेषामेकार्षेयः । गार्त्समद-इति होता । गृत्समदवद्-इत्यध्वर्युः ॥

मित्रयुवः (वाध्य्र्यश्वाः)

अथ वाध्य्र्यश्वाः मित्रयुवः । तेषामेकार्षेयः । वाध्य्र्यश्व-इति होता । वध्य्र्यश्ववद्-इत्यध्वर्युः ॥

इतीमे भृगवो व्याख्याताः ॥

अथ प्रवरगणना । तत्रादौ भृगवः— एवकार इतरेषां व्यावृत्त्यर्थः । अग्रे आदौ व्याख्यास्यामः वक्ष्यामः । प्राधान्यादिति शेषः । भृगोः प्राधान्यं तु ' महर्षीणां भृगुरहम् ' इति भगवद्वाक्यात्, मोक्षधर्मेषु भृगोर्वासुदेवांशताश्रवणात्, आधानमन्त्रेषु भृगूणामेवादौ पार्थक्येन मन्त्रकथनाच्च । अथवा एवकारोऽग्रशब्देनान्वेति । अग्रे आदादेव ये भृगुत्वं प्राप्ता भृगवस्तान्वक्ष्यामः, न द्व्यामुष्यायणत्वेन पश्चाद्भृगुत्वमापन्नानिति, द्व्यामुष्यायणानामुत्तरत्र वक्ष्यमाणत्वात् ।

' जामदग्न्या वत्साः ' इत्यत्र वत्सानां जामदग्न्या इति विशेषणं अजामदग्न्यवत्सनिराकरणार्थं, पञ्चावत्तित्वप्राप्त्यर्थं, जामदग्न्याप्रीप्राप्त्यर्थं च । तेषां जामदग्न्यवत्सानां पञ्चार्षेयः प्रवरः, भार्गवच्यावनाप्नवानौर्वजामदग्न्येति । अयं च होतुः ' अमुतोऽर्वाचो होता ' इति वचनात् । अमुतः मूलभूतादृषेरारभ्य अर्वाचः अर्वाग्जातान् मन्त्रदृशः । क्रमेण तदपत्यसंबन्धेन प्रार्थयते तमग्निमित्यर्थः । जमदग्निवदूर्ववदप्नवानवच्च्यवनवद्भृगुवदित्ययं प्रवरोऽध्वर्योः, ' अत ऊर्ध्वान्मन्त्रकृतोऽध्वर्युर्वृणीते ' इति वचनात् । अतः यजमानादूर्ध्वान् मन्त्रदृग्भिरव्यवहिताना मूलभूतात् ऋषेः क्रमेण संकीर्त्य तद्वत्तद्वदिति सादृश्यसंबन्धेन अग्निं वृणीते प्रार्थयते इत्यर्थः । एष एव प्रवरक्रमविशेषो होतुरध्वर्योश्च आ अध्यायपरिसमाप्तेः सर्वत्रोपदेष्टव्यः । त्र्यार्षेयमु हैके, ब्रुवते इति शेषः । त्र्यार्षेयं प्रवरमेके आचार्या ब्रुवते इत्यर्थः । उ ह इति निपातः अवधारणार्थो वाक्यालङ्कारार्थो वा । तं प्रवरं दर्शयति — ' भार्गवौर्वजामदग्न्येति, जमदग्निवदुर्ववद्भृगुवदिति ' इति । एनमेव प्रवरमन्येष्वतिदिशति— एष एवाविकृतो जामात्यैतिशायनेत्यादिना प्राचीनयोग्यानामित्यन्तेन सूत्रेण । एषोऽनन्तरोक्तः पञ्चार्षेयस्त्र्यार्षेयो वा जामात्यादीनां नवानां भवतीत्यर्थः ।

अथाऽऽर्ष्टिषेणानामित्यत्र अथशब्दः पृथगयं गण इति ज्ञापनार्थः । एवं सर्वत्र । अन्यद्गतार्थम् । ' अथ वीतहव्याः ' इत्यारभ्य ' पृथुवद्वेनवद्भृगुवत् ' इत्यन्तं सूत्रं स्पष्टार्थम् ।

चतुर्विधा हि शुनकाः । केचिच्छुनकादेव जाताः । केचित् गृत्समदादेव जाताः । केचित् भृगोरपत्यं गृत्समदस्ततो जाताः । केचित् भृगोरपत्यं शुनहोत्रस्तदपत्यं गृत्समदस्ततो जाताः । तत्र गृत्समदादेव ये जातास्तेषामेवायं प्रवरो नान्येषामित्येतदर्थं गृत्समददृष्टाप्रीप्रापणार्थं च गार्त्समदा इति विशेषणम् । इतरेषां तु सूत्रान्तरोक्ताः प्रवरा ज्ञेयाः । तत्र आद्यानां शौनकार्षेयः प्रवरः । तृतीयानां भार्गवगार्त्समदेति द्व्यार्षेयः । चतुर्थानां भार्गवशौनहोत्रगार्त्समदेति त्र्यार्षेय इति । एकार्षेये ' अमुतोऽर्वाचो होता ' ' अत ऊर्ध्वान्मन्त्रकृतोऽध्वर्युर्वृणीते ' इत्यनयोर्विध्योर्व्यवस्थापकत्वाभावात् अव्यवस्थाप्राप्तौ होत्रध्वर्युग्रहणं तद्धितान्तो होतुः प्रवरो वत्प्रत्ययान्तोऽध्वर्योरित्येवं व्यवस्थेति प्रदर्शनार्थम् । मित्रयुवां वाध्य्र्यश्वा इति विशेषणं वाध्य्र्यश्वदृष्टाप्रीप्रापणार्थम् । ' वाध्य्र्यश्वेति होता वध्य्र्यश्ववदित्यध्वर्युः ' इत्यत्र होत्रध्वर्युग्रहणमुक्तव्यवस्थायास्तत्रैव प्राप्तिशङ्कानिरासार्थम् ।

इतीमे भृगवो व्याख्याता इति । उक्तानुभाषणस्येदं प्रयोजनम्— अविद्यमानभृगुशब्दानामपि शुनकमित्रयुवां भृगुत्वं यथा स्यादिति । तेन ' भृगूणां त्वा ' इति यथर्ष्याधाने ' भार्गवो होता भवति ' इत्यादौ

च उपप्रवेशसिद्धिः । जामदग्न्यवत्सानां जामा(बा)-ल्यादीनां च परस्परमविवाहः, प्रवरैक्यात् सगोत्रत्वाच्च । एवं आर्ष्टिषेणानामपि, त्रिप्रवरसाम्यात् । यद्यपि त्रिप्रवरार्ष्टिषेणानां नान्यैः सह द्विप्रवरसाम्यं तथापि पञ्चार्षेयसंगतमपि प्रवरसाम्यमेष्वविवाहप्रयोजकम्, 'वत्सा विदा आर्ष्टिषेणा इत्येतेषामविवाहः' इति बौधायनोक्तेः । अजामदग्न्यवत्सार्ष्टिषेणाभ्यां सप्रवरत्वादविवाहः । वीतहव्यादीनां तु स्वं स्वं गणं हित्वा परस्परं पूर्वैः सह (च) विवाहो भवत्येव, द्विप्रवरसाम्याभावात् । इति भृगुगोत्रप्रवरकाण्डम् । प्रच.

आश्वलायनश्रौतसूत्रम्

जामदग्न्या वत्साः

जामदग्न्या वत्साः । तेषां पञ्चार्षेयः । भार्गव-च्यावन-आप्नवान-और्व-जामदग्न्य-इति ॥

इदानीं प्रवरा अनुक्रमिष्यन्ते । द्विविधा वत्सा जामदग्न्या अजामदग्न्याश्च । तत्र ये 'जामदग्न्या वत्सा वयम्' इति स्मरन्ति, तेषां पञ्चार्षेयः प्रवरो भवति भार्गव-च्यावन-आप्नवान-और्व-जामदग्न्य-इति ।

गानावृ.

अजामदग्न्या वत्साः

अथ हाजामदग्न्यानां भार्गव-च्यावन-आप्नवान-इति ॥

ये तु 'वयं अजामदग्न्या वत्साः' इति, तेषां त्र्यार्षेयः प्रवरो भवति भार्गव-च्यावन-आप्नवान-इति । एतेषां अजामदग्न्यत्वात् और्वजामदग्न्यशब्दौ न भवतः । अत एव तौ शब्दौ जामदग्न्यत्वप्रयुक्तौ । द्विप्रकाराणां वत्सानां परस्परमविवाहः, त्र्यार्षेयसंनिपातात् । एतदुक्तं भगवता बोधायनेन—'त्र्यार्षेयाणामविवाहः' इति ।

गानावृ.

आर्ष्टिषेणाः

आर्ष्टिषेणानां भार्गव-च्यावन-आप्नवान-आर्ष्टिषेण-आनूप-इति ॥

(१) आश्वौ. २।६।१० ; गोप्र. २८.

आर्ष्टिषेणेति । अयमपि पञ्चार्षेयप्रवरः । गनावृ.

विदाः

विदानां भार्गव-च्यावन-आप्नवान-और्व-वैद-इति ॥

अयमपि पञ्चार्षेय एव । विदानां और्वशब्दसमन्वयात् जमदग्निगोत्रत्वमप्यस्ति । वत्सानां विदानां आर्ष्टिषेणानां च क्वचिद्दषिसंनिपातात् क्वचित् सगोत्रत्वाच्च परस्परमविवाहः । सर्वेषु च समानप्रवरत्वादविवाहः । सर्वत्र चैवं समानधर्मेषु । गानावृ.

यस्काः

१ यस्क- २ वाधूल- ३ मौन- ४ मौक- ५ शार्कराक्षि- ६ सार्ष्टि- ७ सावर्णि- ८ शालङ्कायन- ९ जैमिनि- १० जैव(दैव)न्त्यायनानां भार्गव-वैतहव्य-सावेतस-इति ॥

अयं गणः त्र्यार्षेयः । यस्कादीनां दशानां परस्परमविवाहः । प्रवरेषु क्वचिच्छास्त्रान्तरात् पदविपर्यासो वर्णविपर्यासो वा पदान्यत्वं वाऽस्ति, न तेन प्रवरान्यत्वं भवतीत्यवगन्तव्यम् । गानावृ.

श्यैताः (वैन्याः)

श्यैतानां भार्गव-वैन्य-पार्थ-इति ॥

त्र्यार्षेयोऽयम् । गानावृ.

मित्रयुवः

मित्रयुवां वाध्र्यश्व-इति । त्रिप्रवरं वा भार्गव-दैवोदास-वाध्र्यश्व-इति ॥

मित्रयुवां एकार्षेयोऽयं त्र्यार्षेयो वा प्रवरो भवति । अयं प्रवरविकल्पः सर्वेषां मित्रयुवां, भेदेन स्मरणाभावात् । वत्सानां तु स्मरणादेव वत्सभावतद्भेदात् तत्प्रवरस्य व्यवस्था युक्ता । यत्तु तद्विशेषभेदेन प्रवरभेदग्रहणमिति, तदयुक्तम्, अगृह्यमाणस्य भेदस्य सत्त्वे प्रमाणाभावात् । प्रवरभेदः प्रमाणमिति चेत्, नैतत्साधकं, प्रयोगविकल्पेनापि संभवात् । अतो भेदाग्रहणात् व्यवस्थायां प्रमाणं नास्तीति विकल्प एव प्रवरयोः इत्यध्यवसितम् । एवमेव त्र्यार्षेयपञ्चार्षेयविकल्पे आद्यपदविकल्पे वाऽन्यस्मिन्नप्येवं-

विधे ऋषिभेदग्रहणे सति व्यवस्था नास्तीति निश्चीयते ।

गानावृ.

शुनकाः

शुनकानां गृत्समद-इति । त्रिप्रवरं वा, भार्गव-शौनहोत्र-गार्त्समद-इति ॥

एकार्षेयोऽयं त्र्यार्षेयो वा शुनकानां प्रवरः ।

गानावृ.

कात्यायन-लौगाक्षि-श्रौतसूत्रम्

जामदग्न्या वत्साः

भृगूणामादितो व्याख्यास्यामः—

१ * भृगवः २ जमदग्नयः ३ वत्साः ४ दार्भिः ५ नाडायनाः ६ वागायन- ७ आनुसातकि- ८ जैह्यति- ९ पैल-१० शौनकायनि- ११ जीवन्ति- १२ काम्बलोदरि- १३ वैहीनरि- १४ वैरोहित्य- १५ रेखायनि- १६ पार्षति- १७ वैश्वानरि- १८ वैरूपाक्षि- १९ पार्णिलि- २० वृकाश्वकानां २१ उच्चैर्मन्यु- २२ सात्यकर्णि- २३ वैष्टपुरेयि- २४ वालाकि- २५ तौलकेशिनां २६ ऋतभाग- २७ आर्तभाग- २८ मार्कण्डेय- २९ मण्डु- ३० माण्डव्य- ३१ माण्डूकेय- ३२ आजिहीन- ३३ आतिथीनां ३४ स्थौमाङ्गोरि- ३५ स्थौलपिण्डि- ३६ सौखबर्हि- ३७ शार्कराक्षि- ३८ देवमतीनां ३९ आर्कायण- ४० आह्वायन- ४१ गाङ्गायन- ४२ गेह्यायन- ४३ गोष्ठायन- ४४ वैशम्पायन- ४५ शार्ङ्गरव- ४६ गालव- ४७ य-

(१) **गोप्र.** २५-२६ ; **संप्र.** ६१७, ६२४ ; **प्रद.** ११० ; **संकौ.** १८३ ; **बाल.** ११५३ (पृ. १८३) ; **संर.** ४२८.

* **संप्र. संकौ. बाल. संर.** इत्यादिनिबन्धग्रन्थैः पूर्वोक्तेषु बौधायनोक्तेषु गणेषु संगृहीतानां गोत्रनाम्नां कात्यायनाद्युक्तेषु गणेषु न पुनः सग्रहः कृतः । अतः तानि तानि नामानि तत्र तत्र सन्तीति ऊह्यम् ।

४ **संप्र. संकौ. संर.** (०) .

५ **गोप्र. संप्र. प्रद. संकौ. संर.** नालायनाः ; **बाल.** मालायनः .

६ **बाल.** बागायनः .

७ **प्रद.** अनुसातकिः ; **संकौ. संर.** अनुमातकयः ; **बाल.** आनुशानकिः .

८ **प्रद.** जैह्मजि ; **संकौ. संर.** जैह्मतयः ; **बाल.** जैह्मातिः .

९ **गोप्र.** पल ; **संप्र.** पौल.

१० **गोप्र.** शौनकार्यान.

१३ **गोप्र.** वैहानरि ; **संकौ. संर.** वैहायनाः .

१६ **गोप्र.** पार्वति ; **प्रद. बाल.** पार्वतिः .

१९ **गोप्र. संप्र.** पाणिलि ; **प्रद.** पार्णिनलिः ; **संर.** पाणिनिः .

२१ **गोप्र.** उच्चयमान ; **संप्र. संकौ. बाल. संर.** उच्चयमानाः ; **प्रद.** रुचमानः .

२२ **प्रद.** सात्यकर्णिः .

२४ **प्रद.** बालाकिः ; **संकौ.** बालाकयः ; **बाल.** वालकिः ; **संर.** कालाकयः .

२५ **गोप्र.** तौलकेशीनाम् ; **संर.** तालकेशिनः .

२९ **गोप्र.** मण्ट ; **संप्र.** माण्डूकेय.

३२,३३ **गोप्र.** आजिहातिथीनाम् ; **संप्र.** आजिहीतिथयः, आजिहीतातिथीनाम् ; **प्रद.** आजिहीतिथिः ; **संकौ.** आजिहीताः, आतिथयः ; **बाल.** आजिहितः अतिथिः ; **संर.** आजीहिताः, आतिथयः .

३४ **गोप्र.** स्थौमागौरि ; **संप्र. संकौ. संर.** स्थौमाङ्गिरयः ; **प्रद. बाल.** स्थौमाङ्गारिः .

३५ **गोप्र.** स्थौल ; **संप्र.** स्थौलसौखाः ; **प्रद. संकौ. बाल. संर.** स्थौलाः .

३६ **संप्र.** बर्हिषः ; **प्रद.** सौखोवाहिः ; **संकौ. संर.** सौरवाः बर्हिषः ; **बाल.** सौरवः, बर्हिः .

३८ **प्रद. बाल.** (०) .

४० निबन्धकाराणां मते काह्वायनाः इति ।

४१ **गोप्र.** गार्म्यायन ; **संप्र.** गार्गायणाः ; **प्रद. बाल.** गार्भायणः ; **संकौ. संर.** गार्ग्यायणाः .

४२ **गोप्र.** गोह्यायन ; **संप्र.** गार्भायणाः ; **बाल.** गेह्यायणः .

४३ **गोप्र.** गोष्ठयायन ; **संप्र.** गोष्ठयायन, गोष्ठायनाः इत्यपि ; **बाल.** गोष्ठायणः .

४५ **गोप्र.** सार्भरव.

४६ **गोप्र.** गौलव.

४७ **प्रद.** वाणूकेयः ; **संकौ. बाल. संर.** वाणकेयाः .

४८ वैकर्णि– ४९ साङ्कृत्य– ५० ऐतिशायनानां ५१याज्ञेय–५२ भ्राष्ट्रेय–५३ भ्रास्नेय–५४ लाक्षेय– ५५ लाकुचि– ५६ ललाटि– ५७ पारिमाण्डलीनां ५८ मालायन– ५९ अविगौवि– ६० सौष्मिकीनां ६१ पैङ्गलायन –६२ सात्यकायन– ६३ कौचहस्ति– ६४ चान्द्रमस– ६५ आनुलोमि– ६६ कौटिल्य– ६७ चौक्ष– ६८ क्रौञ्चाक्षि– ६९ कांस– ७० शारद्वति– ७१ वाधापलेपय– ७२ नैकर्षि–

४८ **गोप्र.** रैकणि.

४९ **संकौ. संर.** सांकृतयः .

५० **संप्र.** रैतिकायणाः, इतिकाण्वायनानाम् ; **प्रद. संकौ. बाल. संर.** ऐतिकायनाः .

५३ **प्रद.** बास्नेयः ; **बाल. संर.** भास्नेयाः .

५५ **गोप्र.** लाकुश्चि ; **संप्र.** लाछविः इत्यपि ; **प्रद.** लापुः .

५६ **गोप्र.** लालाटि ; **प्रद.** विलालाटिः ; **संकौ. संर.** लालाटयः .

५७ **संप्र.** पारिमण्डलयः .

५९ **गोप्र.** अतिगौवि ; **संप्र.** अवयः, गौवयः, औदुन्धिभौधि ; **प्रद.** अविः, गौविः ; **संकौ. संर.** आवयः, आङ्गावयः ; **बाल.** अविः, गोविः .

६० **संप्र.** सोत्मिकानां इत्यपि ; **संर.** सैष्पिकयः .

६३ **गोप्र.** कौवहहस्ति ; **प्रद.** कोचिहस्तिः ; **बाल.** कोयष्टिः .

६५ **गोप्र.** आनुलौमि ; **संप्र.** अनुलोमिनः ; **प्रद.** अनुलोमिः ; **संकौ. संर.** आनुलोमिनः ; **बाल.** औडुलोमिः .

६६ **गोप्र.** कौट ; **संप्र.** कोठाः, क्रौञ्चाः ; **प्रद.** क्रौञ्चः ; **संकौ. संर.** क्रौञ्चाः ; **बाल.** कौञ्चः .

६७ **गोप्र.** चक्षु ; **संप्र.** श्रौक्षाः ; **प्रद. बाल.** (०) ; **संकौ.** चैक्षाः ; **संर.** चेक्षाः .

६८ **बाल.** क्रौञ्चवाक्षः .

६९ **गोप्र.** कानां स ; **संप्र. प्रद. संकौ. बाल. संर.** (०) .

७० **गोप्र.** सारध्वजि ; **संप्र.** स्मरध्वजयः, सारध्वजि ; **प्रद. बाल.** सारध्वजिः ; **संकौ.** सौरध्वजयः ; **संर.** सौरध्वजयः .

७१ **संप्र.** वासाः लेपनाः, वाल्यालेपाय ; **प्रद.** वाधालेपः ; **संकौ. संर.** वाध्यात्केयाः ; **बाल.** बान्धलेयः .

७२ **गोप्र.** नैवर्षि ; **बाल.** भैकर्षिः .

७३ शाकल्य– ७४ उष्ट्राक्षि– ७५ वाकायनि– ७६ अनुमति– ७७ जैकजिह्वि– ७८ जैह्माश्मन्य– ७९ आष्मक्रम– ८० निराणि– ८१ वासि– ८२ मादन– ८३ स्योष– ८४ स्यन्दनि– ८५ काठेरणि– ८६ लावेरणि– ८७ सौगोलि– ८८ काशकृत्स्न– ८९ माध्योदाः इत्येतेषामविवाहः। तेषां पञ्चार्षेयः प्रवरो भवति। भार्गव– च्यावन– आप्रवान– और्व– जामदग्न्य– इति । भृगुवत्– च्यवनवद्– अप्रवानवद्– ऊर्ववद्– जमदग्निवद्– ॥

विदाः

अथ १ जमदग्नयो विदाः २ प्राचीनयोग्याः

७३ **गोप्र.** साककल्प.

७५,७६ **गोप्र.** पाकानुमति ; **संप्र. संकौ. संर.** पाकानुमतयः ; **प्रद. बाल.** पाकानुमतिः .

७७ **संप्र.** जैकजिह्वयः ; **प्रद.** अजैकजिह्विः ; **संकौ.** जैकजिह्वयः ; **बाल.** अजैकजिह्विः ; **संर.** कनिष्णयः .

७८ **गोप्र.** वैह्माश्मन्य ; **संप्र.** जैह्माश्मनयः ; **प्रद. बाल.** जैह्मायनिः ; **संकौ. संर.** जैह्माशिनयः .

७९ **गोप्र.** आश्मक्रमणि ; **बाल.** आशाक्रमः .

८० **संकौ. संर.** निरीगयः ; **बाल.** मिगणिः .

८१ **प्रद.** वासिसादनः .

८२ **गोप्र.** मादान ; **संप्र. बाल. संर.** सादनाः ; **संकौ.** सदनाः . उपरितनं नाम द्रष्टव्यम् ।

८३ **संकौ.** स्पोषाः ; **संर.** स्योयाः .

८४ **प्रद. बाल.** स्पन्दतिः .

८५ **गोप्र. बाल. संर.** कटेरणि ; **संप्र.** कण्ठेरणयः ; **प्रद.** कण्ठेरणिः ; **संकौ.** कठेरणयः .

८६ **गोप्र. संकौ. संर.** लवेरणि ; **संप्र.** भवेरणयः ; **प्रद. बाल.** गवेरणिः .

८७ **गोप्र.** सौगौलि ; **संर.** यौगोलयः .

८८ **गोप्र.** कासकृत्स्न.

८९ **बाल.** मध्योदः .

(१) **गोप्र.** २६. ; **संप्र.** ६१८, ६२४ ; **प्रद.** १११ ; **संकौ.** १६४ ; **संर.** ४२९.

१ **जेबी.** अथ जमदग्नयो विदाः .

३ पौलस्त्याः ४ वेदभूताः ५ क्रौञ्चायनाः ६ अभयजाताः ७ त्रैकायनाः ८ अवटाः ९ भ्राजत्याः इत्येतेषामविवाहः । तेषां त्र्यार्षेयः प्रवरो भवति । भार्गव-और्व-जामदग्न्य-इति । भृगुवद्-ऊर्ववद्-जमदग्निवद्-इति ॥

वात्स्याः (अजामदग्न्या वत्साः)

वात्स्यानां त्र्यार्षेयः प्रवरो भवति । भार्गव-च्यावन-आप्नवान-इति । भृगुवत्-च्यवनवद्-अप्नवानवद्-इति ॥

आर्ष्टिषेणाः

१ भृग्वन्दीपाः २ मार्गपथाः ३ ग्राम्यायणिः ४ अध्वनैकसिः ५ आपस्तम्बिः ६ भाल्विः ७ कार्दमायन- ८ आर्ष्टिषेण- ९ गर्दभयः १० अनूपाः इत्येतेषामविवाहः । तेषां पञ्चार्षेयः प्रवरो भवति । भार्गव- च्यावन- आप्नवान- आर्ष्टिषेण- आनूप-

४ **गोप्र. संप्र.** वेदभृतः ; **प्रद. संकौ. संर.** वेदभृत् .

५ **प्रद.** क्रौङ्कायनः .

७ **प्रद.** ष्टैकायनः .

९ **गोप्र.** भ्राजः ; **संप्र.** भ्राजोत्याः , भ्राजन्त्याः, अस्यानन्तरं भादन्त्याः, ष्टैकायनाः इत्यधिकम् ; **प्रद.** भ्राजः, भ्रदत्यः ; **संकौ.** भ्राजः, भ्रादन्त्याः, अनन्तरं वैकायनाः इत्यधिकम् ; **संर.** भ्राजाः, भ्रादन्त्याः, अनन्तरं ष्टैकायनाः इत्यधिकम् .

(१) **गोप्र.** २६ ; **संप्र.** ६२४.

(२) **गोप्र.** २६ ; **संप्र.** ६१९, ६२४ ; **प्रद.** ११२ ; **संकौ.** १८४ ; **संर.** ४३०.

१ **गोप्र.** भृगवेदियाः ; **संप्र.** भृग्वन्दीयः, भृग्वन्दायाः ; **संकौ.** भृग्वन्दीयः ; **संर.** मृट्वङ्गीयः .

२ **संप्र. संकौ. प्रद. संर.** मार्गपथः .

३ **गोप्र.** ग्राम्यायनिः .

४ **संप्र.** नैकसिः, अध्वनैकशिः ; **प्रद.** नेकसिः ; **संकौ. संर.** नैकर्षिः .

६ **गोप्र.** भ्रालिः ; **संप्र.** भाल्विः , बाल्विः इत्यपि ; **प्रद.** माह्लविः ; **संकौ.** वाल्विः ; **संर.** वाल्मिः .

७ **संप्र. प्रद. संकौ. संर.** कार्दमायनिः .

९ **संप्र. संकौ.** गार्दभिः ; **प्रद.** गादर्भिः ; **संर.** गार्लभिः .

१० **संप्र.** अनूपः, आनूपाः इत्यपि.

इति । भृगुवत्-च्यवनवद्-अप्नवानवद्-ऋष्टिषेणवद्-अनूपवद्-इति ॥

मित्रयुवः

१ खालायनाः २ शाकटाक्षाः ३ मैत्रेयाः अथ ४ साञ्चर्यः ५ द्रौणायनाः ६ रौक्ष्यायणाः ७ आपिशलाः ८ पाटिकायनाः ९ हांसजिह्वाः इत्येतेषामविवाहः । तेषां त्र्यार्षेयः प्रवरो भवति । भार्गव- वाध्र्यश्व- दैवोदास- इति । भृगुवद्-वध्र्यश्ववद्-दिवोदासवद्-इति ॥

यस्काः

१ वीतहव्याः[२] २ यस्क- ३ वाधूल- ४ मौन- ५ मौक- ६ जीवन्त्यायन- ७ अर्थलेखयः

(१) **गोप्र.** २७ ; **संप्र.** ६२१, ६२५ ; **प्रद.** ११३ ; **संकौ.** १८५ ; **संर.** ४३०.

१ **गोप्र.** आश्वलायनाः ; **संप्र.** खालायनाः, आश्वलायनाः ; **संकौ.** (०).

२ **गोप्र.** साक्तिताक्षाः ; **संप्र.** शाकटाक्षाः साक्तिताक्षाः ; **प्रद.** शाकटाक्षः ; **संकौ.** शाकटाक्ष्याः ; **संर.** शाकटायनाः .

३ **गोप्र.** मेक्रयाः ; **संप्र.** मैत्रेयाः, मेक्रयाः .

४ **संप्र.** साचर्याः असाञ्चर्याः ; **प्रद.** साचर्यः ; **संकौ.** साञ्चर्याः ; **संर.** साचर्याः .

५ **गोप्र. प्रद. संकौ.** द्रोणायनाः ; **संप्र.** द्वैनायनाः द्रोणायनाः .

६ **गोप्र.** (०) ; **संप्र.** गोप्नायनाः ; **प्रद.** गोपायनः ; **संकौ.** रौक्ष्यायनाः ; **संर.** रौक्थायनाः .

७ **गोप्र. संर.** अपिशलाः ; **संकौ.** (०).

८ **गोप्र.** आठिकायनाः ; **संप्र.** आठिकायनाः, पाटिकायनाः इत्यपि ; **संकौ. संर.** आटिकायनाः .

९ **गोप्र. संप्र.** हासजिह्वाः ; **प्रद. संकौ. संर.** हंसजिह्वाः .

(२) **गोप्र.** २७ ; **संप्र.** ६२०, ६२५ ; **प्रद.** ११३ ; **संकौ.** १८५ ; **संर.** ४२९.

३ **गोप्र.** वधूला.

४ **गोप्र.** माधून ; **संप्र.** माधुलाः माधूलाः ; **प्रद.** माधुलः ; **संकौ. संर.** माधूलाः .

५ **गोप्र.** मौद्ग ; **संप्र.** मौसलाः मौद्गलाः ; **संकौ. संर.** मौसलाः .

६ **गोप्र.** लान्त्यायन ; **प्रद.** (०) ; **संर.** जीवन्तायनाः .

७ **गोप्र.** अर्थलेखाः ; **प्रद.** अर्थलेभिः ; **संर.** अर्थलेखयः .

८ भागलेय— ९ भागविज्ञेय— १० कोशाम्बेय— ११ वृकाश्वकि— १२ मदोकि— १३ बालेय— १४ गौरिक्षित— १५ दैर्घ्यचित— १६ पञ्चालव— १७ पौष्णावतार— १८ मोदायनाः इत्येतेषाम-विवाहः। तेषां त्र्यार्षेयः प्रवरो भवति। भार्गव— वैतहव्य— सावेदस— इति। भृगुवद्— वीतहव्यवत्— सवेदसवद्— इति॥

शुनकाः

१ यांज्ञपयः २ सौकराः ३ मांसगन्धाः ४ कार्दमायनाः ५ चौक्षाः ६ श्रोत्रियाः ७ प्रत्यूषाः ८ गृत्समदाः ९ शुनकाः इत्येतेषामविवाहः। तेषामेकार्षेयः प्रवरो भवति। गार्त्समद— इति। गृत्समदवद्—इति। द्व्यार्षेयो वा। भार्गव-गार्त्समद— इति। भृगुवद्—गृत्समदवद्—इति॥

मानवश्रौतसूत्रम्

वत्साः

भृगूनेवाग्रे व्याख्यास्यामः—

१ जामदग्न्याः— २ वात्स्याः ३ आनुशातकि— ४ वैहति— ५ पैल— ६ शौनकायनि— ७ जीवन्ति— ८ काम्बलोदरि— ९ वैहीनरि— १० वैरोहित्य— ११ लेख्ययनि— १२ वैशाकि— १३ वैश्वानर— १४ वैरूपाक्षि— १५ पौकाशेरलानां १६ पार्णिलि— १७ वृकाश्वकानां १८ उर्ध्वमन्यु— १९ सावर्णि— २० वाल्मीकि— २१ शेरलानां २२ वैष्टपुरेय— २३ पालाक्षि—२४ तौलकेशिनां २५ असं २६ ऋतभाग— २७ आर्तभाग— २८ मार्कण्डेय २९ मण्डु— ३० माण्डव्य— ३१ विभाण्डक— ३२ माण्डूकेय— ३३ अर्चनामां ३४ स्फेनमद्भूती— ३५ स्थौलपिण्डि— ३६ शैपापत्य— ३७ शार्कराक्ष— ३८ देवमतीनां ३९ आयण— ४० आर्चायन— ४१ आह्वायन— ४२ गाङ्गायन— ४३ वैशम्पायन— ४४ वायव्यायन— ४५ औदुन्त्यायन— ४६ सौरयी— ४७ दार्भि— ४८ मालायन— ४९ शार्ङ्गरव— ५० गालव— ५१ चाणूकेय— ५२ वैकर्णि— ५३ शौनकर्णि— ५४ शौण्डकर्णि— ५५ सांकृत्य— ५६ ऐतिशायनानां ५७ याज्ञेय— ५८ भ्राष्ट्रेय— ५९ क्ष्माला— ६० अण्ड— ६१ पारिमण्डलायन— ६२ अलुन्धि— ६३ कौरित— ६४ सौधकीनां ६५ पैङ्गलायन— ६६ सात्यकायन— ६७ कौचहस्ति— ६८कोवहूण्डिम्— ६९ सांख्यमित्र— ७० चान्द्रमित्र— ७१ चान्द्रमसि— ७२ आनुलोमि— ७३ कौटिल्य— ७४ कांस्य— ७५ शारद्वत— ७६ मौद्गडयो— ७७ वाद्यालेह्येयि— ७८ निमिथि— ७९ शाकल्य— ८० उष्ट्राक्षि— ८१ वाकायनि— ८२ अनुमति— ८३ जैह्याशम— ८४ शोकजिह्व— ८५ आत्मदमनि— ८६ वाटार— ८७ किराणि— ८८ माजानाति— ८९ काशकृत्स्न— ९० औषु— ९१ स्रुचतो— ९२ त्रान— ९३ वैहीकारि— ९४ शौक्रायणाः ९५ शकुणिः ९६ शाकट्यायनाः ९७ गोष्ठायनाः ९८ गोलायनाः ९९ डाकव्यायना इति॥ (प्रवराः कात्यायन—लौगाक्षिवत्।)

११ गोप्र. वृकाश्ववि ; संप्र. वृकाश्ववि, वृकाश्मकयः ; प्रद. संकौ. संर. वृकाश्मकयः .
१२ संकौ. संर. मदोकथः .
१३ गोप्र. वारेय ; संप्र. वरेयः वारेयि; प्रद. मञ्चारेयः ; कौ. संर. वारेयाः .
१४ संप्र. गौरीक्षिताः ; प्रद. संर. गैरिक्षिताः .
१५ संप्र. दैर्घचिताः दीर्घचिताः ; प्रद. संकौ. संर. दैर्घचित्ताः .
१७ गोप्र. पौस्नावरार ; संप्र. पौवलाः ; प्रद. पाण्यवत्तः, पौष्णावतः इत्यपि ; संकौ. पौष्णावताः ; संर. पौष्पावताः .
१८ संप्र. गोदायनाः मौदायनाः ; प्रद. संकौ. संर. गोदायनाः .
(१) गोप्र. २७ ; संप्र. ६२१,६२५ ; प्रद. ११३ ; संकौ. १८५.
२ प्रद. (०).
३ संप्र. संकौ. मासगन्धाः ; प्रद. मात्स्यगन्धः .
४ गोप्र. कर्दमायनाः .
५ संकौ. चोक्षाः .
(२) मानवश्रौतसूत्रोक्तो गोत्रप्रवरविचारः प्रा. जॉन ब्रौमहाश्रयेन संपादिताद् 'गोत्रप्रवरमञ्जरी 'पुस्तकात्संगृहीतः।

निमथिताः

वैदा निमथिताः । तेषां पञ्चार्षेयः प्रवरो भवति । भार्गव– च्यावन– आप्नवान– वैद– नैमथित– इति होता । निमथितवद्– विदवद्– अप्नवानवत्– च्यवनवद्– भृगुवद्– इत्यध्वर्युः ॥

आवध्याः

आवध्यायना मौञ्ज्यायनाः । तेषां त्र्यार्षेयः प्रवरो भवति । भार्गव– च्यावन– आवध्य– इति होता । अवध्यवत्– च्यवनवद्– भृगुवद्–इत्यध्वर्युः ॥

विदाः

अथ १ जमदग्नीनाम् । २ प्राचीनयोग्याः ३ पुलस्त्याः ४ वैदभृताः ५ क्रौञ्चायन– ६ अभयजाताः ७ तौगायनाः ८ आवटाः ९ शाकर्णिनाः १० भाल्वशयः ११ भार्गवाः इति ॥ (प्रवराः– भार्गव–च्यावन–आप्नवान– ।)

आर्ष्टिषेणाः

१ ग्रौधेयाः २ मार्गपथाः ३ ग्राम्यायणिः अथ ४ नैकसी– ५ आपस्तम्बिः ६ विभील्लि कार्णि– ७ कार्दमिः ८ आर्ष्टिषेण– ९ गर्दभ– १० शातपथि– इति ॥

मित्रयुवः

१ आपिशायनाः २ कापिशायनाः ३ द्रौणायनाः ४ खालायनाः ५ अविचक्षाः ६ मैत्रेयाः अथ ७ इयः ८ आमोदायनाः ९ आपिशलाः इति ॥

यस्काः

१ वैतहव्य– २ यास्क– ३ माधून– ४ मौक– ५ जीवन्त्यायनः ६ अथले– ७ भागलेय– ८ भागविज्ञेय– ९ कौशाम्बेय– १० वृकाश्वकि– ११ मादाहि– १२ गौरिक्षित– १३ दैर्घ्यचित– १४ वालेयम् – १५ पाञ्चधनाः १६ पौष्णावताः इति ॥ (प्रवराः–भार्गव–वैतहव्य–सावेदस– ।)

शुनकाः

१ गार्त्समदः २ शुनकाः ३ यज्ञवचाः ४ सौकरिः ५ कार्दमायनाः ६ राजबाधव्याः ७ चौक्षाः ८ चोराः ९ श्रोत्रियाः १० प्रत्यराः इत्येते शुनकाः । इत्येतेषां ......इत्यादि ॥ (प्रवराः कात्यायन–लौगाक्षिवत् ।)

वत्सपुरोधसाः

वत्सपुरोधसानां पञ्चार्षेयः प्रवरो भवति । भार्गव – च्यावन– आप्नवान– वात्स– पौरोधस– इति होता । पुरोधसवद्– वत्सवद्– अप्नवानवत्– च्यवनवद्– भृगुवद्– इत्यध्वर्युः ॥

वेद–विश्वज्योतिषाः

वेद–विश्वज्योतिषाः । तेषां त्र्यार्षेयः प्रवरो भवति । भार्गव– वेद– विश्वज्योतिष–इति होता । विश्वज्योतिषवद्– वेदवद्– भृगुवद्– इत्यध्वर्युः ॥

वैन्याः

पार्थवैन्यानां त्र्यार्षेयः प्रवरो भवति । भार्गव– वैन्य– पार्थ– इति होता । पृथुवद्– वेनवद्– भृगुवद्– इत्यध्वर्युः ॥

शुक्लयजुर्वेदपरिशिष्टम्

आर्ष्टिषेणाः

...थां १ ग्राम्यायणिः २ अप्यतेकेसि– ३ आपस्तम्बिः ४ भार्णि– ५ कार्दमिः ६ आर्ष्टिषेण– ७ गर्दभः च ८ अनूपाः इति ॥

मित्रयुवः

१ आपिशायनाः २ कापिशायनाः ३ नारोपायनाः ४ रौद्रायण– ५ आश्वलायनाः ६ अपिकक्षाः ७ मैत्रेयाः ८ अनण्डय्यः ९ आमोदायनाः १० आपिशलाः ११ वाध्य्यश्वाः इति ॥

यस्काः

१ वैतहव्य– २ यास्क– ३ माधून– ४ मौन– ५ मौक– ६ जैवन्त्यायन–७ औप्यले– ८ वालेय– ९ भालेय– १० पान्यचत– ११ प्रोदडव्याजाः इति ॥

शुनकाः

१ गार्त्समदाः २ शुनकाः ३ यज्ञवच– ४ सौकरी– ५ कार्दमायनाः ६ राजवाधव्याः ७ चौक्षाः

(१) शुक्लयजुर्वेदपरिशिष्टोक्तो गोत्रप्रवरविचारः प्रा. जॉन श्रीमहाशयेन संपादितात् ' गोत्रप्रवरमञ्जरी ' पुस्तकात् संगृहीतः ।

८ चौराः ९ श्रौत्रियाः १० प्रत्युराः इति ॥

(प्रवरा.– कात्यायन–लौगाक्षिवत् । भार्गव– शौन-होत्र– गार्त्समद– इति वा इत्यधिकम् ।)

मत्स्यपुराणम्

* सूत उवाच–

[1]इत्याकर्ण्य स राजेन्द्र ओङ्कारस्याभिवर्णनम् ।
ततः पप्रच्छ देवेशं मत्स्यरूपं जलार्णवे ॥

मनुरुवाच–

[2]ऋषीणां नाम-गोत्राणि वंशावतरणं तथा ।
प्रवराणां तथा साम्यमसाम्यं विस्तराद्वद ॥
[3]महादेवेन ऋषयः शप्ताः स्वायम्भुवेऽन्तरे ।
तेषां वैवस्वते प्राप्ते संभवं मम कीर्तय ॥
[4]दाक्षायणीनां च तथा प्रजाः कीर्तय मे प्रभो ।
ऋषीणां च तथा वंशं भृगुवंशविवर्धनम् ॥

मत्स्य उवाच–

[5]मन्वन्तरेऽस्मिन् संप्राप्ते पूर्वं वैवस्वते तथा ।
अश्वमेधे सुवितते ब्रह्मणः परमेष्ठिनः ॥
[6]महादेवस्य शापेन त्यक्त्वा देहान् स्वयं ततः ।
ऋषयस्ते समुद्भूता हुते शुक्रे महात्मना ॥

* मत्स्य. १९५।१–४६ ; गोप्र. २८–३३ ; संप्र. ६६२–६६५. [गोत्रप्रवरऋषिनामसंग्रहः संप्र. ६१८–६२१ ; प्रद. १११–११३ ; संकौ. १८३–१८५ ; बाल. ११५३ (पृ. १८४–१८५) ; संर. ४२८–४३१ इत्यत्र द्रष्टव्यः ।].

(१) मत्स्य. १९५।१ ; गोप्र. २८ ; संप्र. ६६२ रस्याभि (रस्य च).

(२) मत्स्य. १९५।२ ; गोप्र. २८–२९ ; संप्र. ६६२.

(३) मत्स्य. १९५।३ ; गोप्र. २९ ; संप्र. ६६२.

(४) मत्स्य. १९५।४ ; गोप्र. २९ ; संप्र. ६६२ दाक्षायणीनां (दाक्षायणानां).

(५) मत्स्य. १९५।५ अश्वमेधे सुवितते (चरित्रं कथ्यते राजन्) ; गोप्र. २९ ; संप्र. ६६२ पूर्वं वैवस्वते तथा (प्राप्ते वैवस्वते पुरा) सुवितते (तु वितते).

(६) मत्स्य. १९५।६ देहान् (देहं) ततः (तथा) ऋषयस्ते (ऋषयश्च) ; गोप्र. २९ महात्मना (यथेच्छया) ; संप्र. ६६२ स्वयं ततः (समन्ततः) ऋषयस्ते (ऋषयश्च) महात्मना (यथेच्छया).

[1]देवानां मातरो दृष्ट्वा देवपत्न्यस्तथैव च ।
स्कन्नं शुक्रं महाराज ब्रह्मणः परमेष्ठिनः ॥
[2]तज्जुहाव ततो ब्रह्मा ततो जातो हुताशनः ।
ततो जातो महातेजा भृगुश्च तपसां निधिः ॥
[3]अङ्गारेष्वङ्गिरा जातो ह्यर्चिभ्योऽत्रिस्तथैव च ।
मरीचिभ्यो मरीचिस्तु ततो जातो महातपाः ॥
[4]केशैस्तु कपिशैर्जातः पुलस्त्यश्च महातपाः ।
केशैः प्रलम्बैः पुलहस्ततो जातो महायशाः ॥
[5]वसुमध्यात्समुत्पन्नो वसिष्ठश्च तपोधनः ।
भृगुः पुलोम्नस्तु सुतां दिव्यां भार्यामविन्दत ॥
[6]तस्यामस्य सुता जाता देवा द्वादश याज्ञिकाः ।
भुवनो भौवनश्चैव सुजन्यः सुजनस्तथा ॥
[7]शुचिः क्रतुश्च मूर्धा च याज्यश्च वसुदश्च ह ।
प्रभवश्चाव्ययश्चैव दक्षोऽथ द्वादशस्तथा ॥
[8]इत्येते भृगवो नाम देवा द्वादश कीर्तिताः ।
पौलोम्यजनयद्विप्रं देवानां तु कनीयसम् ॥

(१) मत्स्य. १९५।७ ; गोप्र. २९ ; संप्र. ६६२.

(२) मत्स्य. १९५।८ जातो हुताशनः (जाता हुताशनात्) ; गोप्र. २९ ; संप्र. ६६२ तज्जुहाव (तं जुहाव) भृगुश्च (भृगुः स).

(३) मत्स्य. १९५।९ ; गोप्र. २९ ; संप्र. ६६२ जातो ह्यर्चिभ्योऽत्रि (जातस्तृतीयोऽत्रि) मरीचिस्तु (मरीचिश्च).

(४) मत्स्य. १९५।१० कपिशैर्जातः (कपिशो जातः) महायशाः (महातपाः) ; गोप्र. २९ पुलस्त्यश्च (पुलस्त्यस्तु) ; संप्र. ६६२ (कुशैस्तु कपिलैर्जातः पुलस्त्यस्तु महातपाः ।) पू.

(५) मत्स्य. १९५।११ वसिष्ठश्च (वसिष्ठस्तु) ; गोप्र. २९ पुलोम्नस्तु (पुलोम्नश्च) ; संप्र. ५९८ पुलोम्नस्तु (पुलोम्नश्च) उत्त. : ६६२ गोप्रवत्.

(६) मत्स्य. १९५।१२ ; गोप्र. २९–३० तस्यामस्य (यस्यामस्मात्) ; संप्र. ५९८ (यस्यामस्मात्ततोऽपत्यभूता द्वादश देवताः ।) पू. : ६६२ पूर्वार्धे (यस्यामस्मात्ततो जाता देवास्तु द्वादशात्मकाः ।) भौवनश्चैव (भानवश्चैव) सुजन (सुजव).

(७) मत्स्य. १९५।१३ शुचिः क्रतुश्च (क्रतुर्वसुश्च) याज्यश्च (त्याज्यश्च) ; गोप्र. ३० दक्षोऽथ द्वादश (दक्षो द्वादशम) ; संप्र. ६६३ याज्यश्च (याजश्च) शेषं गोप्रवत्.

(८) मत्स्य. १९५।१४ उत्तरार्धे (पौलोम्यां जनयन् विप्रा देवानां तु कनीयसः ।) ; गोप्र. ३० देवा द्वादश कीर्तिताः

१ च्यवनं च महाभागमप्रवानं तथैव च ।
अप्रवानात्मजश्चौर्वो जमदग्निस्तदात्मजः ॥

२ और्वो गोत्रकरस्तेषां भार्गवाणां महात्मनाम् ।
तत्र गोत्रकरान् वक्ष्ये भृगोर्दीप्तौजसस्त्वहम् ॥

वत्साः

३ *भृगु[1]श्च च्यवन[2]श्चैव अप्रवान[3]स्तथैव च ।
और्व[4]श्च जम[5]दग्निश्च [6]वात्स्यो [7]दार्भि[8]र्नैडायनः ॥

४ वैगा[9]यनो वीतिह[10]व्यः [11]पैलश्चैवानु[12]शौतकिः ।
शौन[13]कायनि–जीवन्ति[14]–[15]कौम्बोदाः [16]पार्षतिस्तथा ॥

१ [17]वैहीनरि[18]र्विरू[19]पाक्षो रौहि[20]त्यायनिरेव च ।
वै[20]श्वानरिस्तथा [21]नीलो [22]सावर्णिश्च [23]वृकाश्वकः ॥

२ वै[24]ष्टपुरेयिर्वा[25]लाकिस्तौलके[26]श्यर्त[27]भागिनः ।
ऋत[28]भागोऽथ [29]मार्कण्डि[30]राजिहीनोऽतिथि[31]स्तथा ॥

(देवाग्तु द्वादशात्मकाः) ; **संप्र.** ५९८ द्विप्रं (द्विप्रान्) कनीयसम् (कनीयसः) उत्त. : ६६३ कनीयसम् (कनीयसाम्) .

(१) **मत्स्य.** १९५।१५ च्यवनं च (च्यवनं तु) मप्रवानं (माप्नुवानं) अप्नवा (आप्नुवा) ; **गोप्र.** ३० तथैव च (तथाप्यसौ) ; **संप्र.** ५९८ च्यवनं च (च्यवनं तु) तथैव च (तथाप्यसौ) अप्नवानात्मजश्चौर्वो (आप्नवानात्मजश्चैव) : ६६३ (च्यवनं तु महाभागमाप्नवानं तथाप्यसौ । आप्नवानात्मजश्चौर्वो जमदग्निस्तथाऽऽत्मजः ॥) .

(२) **मत्स्य.** १९५।१६. भृगोर्दीप्तौजसस्त्वहम् (भृगोर्वै दीप्ततेजसा ।) ; **गोप्र.** ३० तत्र गोत्रकरान् (तद्गोत्रप्रवरान्) ; **संप्र.** ६६३ और्वो गोत्रकरस्तेषां (और्वगोत्रकरस्तस्य) शेषं गोप्रवत् .

(३) **मत्स्य.** १९५।१७ ; **गोप्र.** ३० ; **संप्र.** ६६३.

* **इतः परं यैर्निबन्धकारैः गोत्रप्रवरनाम्नां संग्रहः कृतः, तेषां स्थलनिर्देशः प्रथममेव एकत्र दत्तः। पाठभेदाश्च तत्र तत्र द्रष्टव्याः। संप्र.** ६१८ ; **प्रद.** १११ ; **संकौ.** १८४ ; **बाल.** ११५३ पृ. १८३ ; **संर.** ४२८.

३ **मत्स्य.** आप्नुवानः ; **संप्र.** आप्नवानः .

४ **संप्र.** ऊर्वश्च.

६ **गोप्र. संप्र.** वत्सः ; **संकौ.** मात्स्यः ; **संर.** मात्स्याः .

७ **मत्स्य.** दण्डिः ; **गोप्र.** दर्भिः .

८ **प्रद. संकौ. बाल. संर. जेबी.** नाडायनः .

(४) **मत्स्य.** १९५।१८ ; **गोप्र.** ३० ; **संप्र.** ६६३.

९ **गोप्र.** वैरायनः ; **संप्र.** वैशयनः , वैरायणः ; **प्रद. संकौ.** वैरायणः ; **बाल.** (०) ; **संर.** वैरायणाः .

१० **गोप्र.** वीतहव्यः ; **संप्र.** वैतिहयः , वैन्यः ; **प्रद.** वैतिहयः ; **संकौ.** वैन्यः ; **बाल.** वैतिहव्यः ; **संर.** वैन्याः .

१२ **मत्स्य.** चैवात्र शौनकः ; **गोप्र.** आनुसारकिः ; **संप्र.** चैवाथ सात्यकिः .

१३ **मत्स्य.** शौनकायन.

१५ **मत्स्य.** आवेदः ; **संप्र.** कम्बोदाः .

१६ **मत्स्य.** कार्पणिः .

(१) **मत्स्य.** १९५।१९ ; **गोप्र.** ३० ; **संप्र.** ६६३.

१९ **गोप्र.** रौहीत्यायनिः ; **प्रद.** रोहित्यायनः ; **बाल.** रौहित्यायनः .

२१ **गोप्र.** कपानीलुः ; **संप्र.** कथानीलुः, कपानीलुः ; **प्रद.** कपाली ; **संकौ. संर.** कृपानीलुः ; **बाल.** कामालिविः ; **जेबी.** उच्चैर्मन्युः .

२२,२३ **मत्स्य.** लुब्धः सावर्णिकः च सः । ; **गोप्र.** वासावर्णि—विकश्वरुः ; **संप्र.** वसावर्णिः, विवस्वरुः, सावर्णिः, विकस्वरुः ; **प्रद.** विसावर्णिः, विकस्वरः ; **संकौ.** सावर्णिः, निकस्वरुः ; **बाल.** सावर्णिः, विकस्वरः ; **संर.** सावर्णिः, पिकस्वरः .

(२) **मत्स्य.** १९५।२० **गोप्र.** ३० ; **संप्र.** ६६३.

२४ **मत्स्य.** विष्णुः पौरोऽपि ; **गोप्र.** विष्णुः, पैलोऽपि ; **संप्र.** विष्णुः, पौलोमि ; **प्रद. संकौ. संर.** विष्णुः ; **बाल.** विकः .

२५ **गोप्र.** वलाकिः ; **संप्र.** बालाकि.

२६ **मत्स्य.** ऐलिकः ; **गोप्र.** नौलिकः ; **संप्र.** नौलिकेल, तौलकेशिः ; **प्रद.** तौलिकोशिः ; **संकौ. संर.** तौलकेशिः ; **बाल.** जौलिकेशिः .

२७ **मत्स्य.** अनन्तभागिनः ; **गोप्र.** नान्तभागिनः ; **संप्र.** अन्तभाविनः .

२८ **मत्स्य.** मृगमार्गेय ; **गोप्र.** सृतो भार्गोऽथ ; **संप्र.** ऋताभागोऽथ.

२९ **मत्स्य.** मार्कण्ड ; **गोप्र.** मार्कण्डुः ; **जेबी.** मार्कण्डेयाः .

३० **मत्स्य.** जविनः ; **गोप्र. संकौ. संर.** जहिनः ; **संप्र.** अह्निनः , जहतः ; **प्रद. बाल.** जहिमः .

३१ **मत्स्य.** नीतिनः ; **गोप्र. प्रद. संकौ. बाल. संर.** वीतिनः ; **संप्र.** वीतितः, बीजिनः ; **जेबी.** आतिथिः .

१ [३२]मण्डु-[३३]मौण्डव्य-[३४]मौण्डूक-[३५]फेनपाः [३६]स्तनितस्तथा ।
[३७]स्थौलपिण्डिः [३८]शिखापत्तिः [३९]शार्कराक्षिस्तथैव च ॥
२ [४०]जलधिः सेनजित्[४१]क्रुत्स्नः[४२] [४३]कुत्सोऽन्यो मौद्गलायनः[४४] ।
[४५]आर्कायणो [४६]देवमतिः [४७]मण्डूकि[४८]र्ऋषभः [४९]सुतः ॥
३ [५०]सांकृत्य[५१]श्चातकिः [५२]सौर्पिर्यज्ञपिण्डा[५३]यनस्तथा ।
[५४]गार्ग्यायणो [५५]गायनश्च ऋषिर्गो[५६]हायणस्तथा ॥
१ [५७]गोष्ठायनो [५८]वाह्यायनो [५९]वैशम्पायन[६०]गौलवौ ।
वैकर्णेयः[६१] [६२]शाङ्गरवो [६३]याज्ञेयि[६४]भ्राष्ट्रकायनिः ॥
२ [६५]लालाटि[६६]र्लाकुचिश्चैव [६७]लाक्षेयः [६८]परिमण्डलः ।
[६९]आलुकिः [७०]सौचकिः [७१]कौत्सस्तथान्यः [७२]पैङ्गलायनिः ॥
३ [७३]शाल्यायनि[७४]र्माल्यायनिः [७५]कौटिल्यः [७६]कौचहस्तिकः ।

---

(१) **मत्स्य.** १९५।२१ ; **गोप्र.** ३० ; **संप्र.** ६६३.

३२ **मत्स्य.** मण्ड ; **संप्र.** मण्डू.

३४ **गोप्र.** मण्डूक.

३५, ३६ **गोप्र. जेबी.** स्फेनपागनिभः ; **संप्र.** फेनपा गनिभः, फेनपाः, स्थलिनः ; **प्रद.** फेनपास्तलिनः ; **संकौ.** फेनयाः, तलिनः ; **बाल.** फेनयः, ललिनः ; **संर.** फेनयाः, तलिनः .

३७ **मत्स्य.** स्थलपिण्डः .

३८ **मत्स्य.** शिखावर्णः ; **गोप्र.** शिषापत्तिः ; **प्रद.** शिखापत्रिः ; **संकौ.** शिखापतिः ; **बाल.** शिखायतिः .

३९ **गोप्र. संप्र.** शर्कराक्षिः .

(२) **मत्स्य.** १९५।२२ ; **गोप्र.** ३०–३१ ; **संप्र.** ६६३.

४० **मत्स्य.** जालधिः ; **गोप्र.** जलुपि. प्रा. जॉन ब्रौमहाशयः सूचयति यत् इदमर्धं प्रमादेनात्र पठितम् । वस्तुनस्तु पञ्चविंशतितमश्लोकस्य पूर्वार्धादनन्तरं पठनीयमिति ।

४१ **मत्स्य.** सौधिकः ; **गोप्र.** ध्वजकृत् ; **संप्र.** सौध्वजिः ; **प्रद.** सैन्यजित् ; **संकौ. संर.** सेनाजित् ; **बाल.** सैम्यजित् .

४२ **मत्स्य.** क्षुभ्यः ; **गोप्र.** सन्यौ .

४३, ४४ **गोप्र.** तथाऽन्यः पौगलायनिः ; **संप्र.** तथाऽन्यः पागलायनिः, पौङ्गल्यायनिः ; **प्रद. संकौ. बाल. संर.** पैङ्गलायनिः .

४५ **मत्स्य.** माङ्कायनः ; **गोप्र. संप्र.** मार्कायणः .

४६ **मत्स्य.** देवपतिः ; **गोप्र. संप्र.** दिवपतिः ; **प्रद.** दिवपीतिः ; **संकौ. संर.** दिवःपतिः ; **बाल.** दिवस्मतिः .

४७ **मत्स्य.** पाण्डुरोचिः ; **गोप्र.** माण्डूम.

४८,४९ **मत्स्य.** सगालवः ; **गोप्र.** वृषभिः स च; **संप्र.** वर्षभिः स च. अन्ये निबन्धकाराः उपरिदर्शितं पाठमनुसरन्ति ।

(३) **मत्स्य.** १९५।२३ ; **गोप्र.** ३१ ; **संप्र.** ६६३. गोत्रप्रवरमञ्जर्यां संस्कारप्रकाशे च अत्र ' लवः सांकृत्यशालाकिस्तथा चैवानुशातकिः । कोपियज्ञो मित्रयज्ञस्तथा चैवामिलायनः ॥ ' इति श्लोकः पठ्यते । तदनुसारेण निबन्धकारैर्गोत्रनामसंग्रहोऽपि कृतः ।

लवः— **प्रद.** प्लवः ; **संकौ.** पलवः ; **बाल.** स्तनः ; **संर.** पलतः पलवः .

कोपियज्ञः— **प्रद. बाल.** कापयज्ञः .

आमिलायनः— **गोप्र.** मित्रलायनः .

५४ **गोप्र.** मार्गायनः ; **जेबी.** गाङ्गायन.

५५ **गोप्र.** ह्रायनिः ; **संप्र.** ह्रायनः , ह्रायनिः ; **प्रद. बाल.** हायनिः ; **संकौ.** हायतिः ; **संर.** हापत्तिः ; **जेबी.** आह्वायनः .

५६ **गोप्र.** गोत्सायनः ; **संप्र. जेबी.** गोदायनः .

(१) **मत्स्य.** १९५।२४; **गोप्र.** ३१; **संप्र.** ६६३.

५७ **गोप्र.** गोष्ठ्यायनः .

५८ **गोप्र. संप्र.** हायनिः च; **जेबी.** चाणुकिः च.

५९, ६० **मत्स्य.** वैशम्पायन एव च.

६१ **मत्स्य. गोप्र. संर.** वैकर्णिनिः ; **संप्र.** वैकर्णेयः, वैकर्णेयिः ; **प्रद.** कैलवर्णधिः ; **संकौ. बाल.** वैकर्णिपिः .

६३ **गोप्र.** यज्ञेयिः .

६४ **मत्स्य.** भ्राष्ट्कायणिः ; **गोप्र.** भार्ष्टकायनिः ; **संप्र.** भाण्यकायनिः भाल्लकायनिः .

(२) **मत्स्य.** १९५।२५; **गोप्र.** ३१ ; **संप्र.** ६६४.

६५ **गोप्र.** लालविः ; **संप्र.** लालादिः .

६६ **मत्स्य.** नाकुलिः ; **गोप्र.** लाभृतिः ; **संप्र.** लाकुविः .

६७ **मत्स्य.** लौक्षिण्यो ; **गोप्र.** लल्यानः ; **संप्र.** लक्ष्मण्य, लाक्षण्यः ; **प्रद. बाल.** ललामः ; **संकौ. संर.** लाक्ष्मणः .

६९,७०,७१,७२. **गोप्र. संप्र.** (०).

(३) **मत्स्य.** १९५।२६ ; **गोप्र.** ३१; **संप्र.** ६६४.

७३ **मत्स्य.** सात्यायनिः ; **बाल.** शाक्यायतिः .

७४ **मत्स्य.** मालयनिः ; **गोप्र.** मलायनिः ; **संप्र.** नालायनिः, माल्यायनिः ; **प्रद. बाल.** मलपतिः .

७५ **मत्स्य. गोप्र.** कौटिलिः ; **संप्र.** कौटलः , **प्रद. संर.** कौटलिः ; **संकौ.** कौटालिः ; **बाल.** कौलिः.

७६ **गोप्र.** कोचहस्तिकः ; **संप्र.** चलहस्तिकः .

सौह[७७]सौक्तिः सकौ[७८]क्षिः कौसि[७९]श्चान्द्रमसि[८०]स्तथा ॥
[१]नैकजिह्वो[८१] जिह्वशून्यः[८२] केह्लेटि[८३]र्हिकश्वरिः[८४] ।
शारद्वतिः[८५] स नैमिश्यो[८६] लोष्टाक्षि[८७]श्च गवेरणिः[८८] ॥
[२]वार्गायनि[८९]श्चानुमतिः[९०] पौर्ण[९१]सौगन्धि[९२]काशकृत्[९३] ।
समाध्योदा[९४]स्तथैवैषां पञ्चार्षः प्रवरो मतः ॥

१ भृगुश्च च्यवनश्चैव अप्नवानस्तथैव च ।
और्वश्च जमदग्निश्च पञ्चैते प्रवरा मताः ॥

---

७७ **मत्स्य.** सौहः सोक्तिः ; **गोप्र.** सौक्तिः ; **संप्र.** शौक्तिः, सौक्तिः ; **प्रद.** शौक्ति ; **संकौ. संर.** सौक्तिः ; **बाल.** (०).

७८ **मत्स्य.** सकौवाक्षिः ; **गोप्र.** तकोटरश्चैव; **संप्र.** सकोटरश्चैव, कोटरः ; **प्रद. बाल. संर.** कोटरः ; **संकौ.** कोठरः .

७९ **मत्स्य.** कौसिः ; **गोप्र.** साक्षी ; **संप्र.** साक्षि, साक्षी ; **प्रद. बाल.** साक्षिः ; **संकौ. संर.** साक्षी.

८० **गोप्र. संप्र. प्रद. संकौ. बाल. संर.** सान्द्रमणिः .

(१) **मत्स्य.** १९५।२७ ; **गोप्र.** ३१ ; **संप्र.** ६६४.

८१ **गोप्र.** नैकजिह्वः ; **संप्र.** जेकजिह्विः .

८२ **मत्स्य.** जिह्वकः च ; **संप्र.** जैकशून्यः ; **संकौ. बाल. संर.** जिह्वाशून्यः .

८३ **मत्स्य.** व्याधाज्यः ; **गोप्र.** केसलेढिः ; **संप्र.** केह्मलेठिः , केयलेढिः ; **प्रद.** केझलेटिः ; **संकौ.** केल्लेढिः ; **बाल.** केह्मलैटिः ; **संर.** केललेटिः ;

८४ **मत्स्य.** लौहवैरिणः ; **संप्र.** हिकस्वरः , हिकश्वरिः ; **प्रद.** हिकश्मरिः ; **बाल.** हिकश्वः ; **संर.** हिकश्वरिः .

८५ **मत्स्य.** शारद्वतिकः ; **गोप्र.** सौरद्धतिः ; **संप्र.** सौरद्वतिः, सारध्वजिः ; **प्रद.** सौरद्वतिः ; **संकौ. संर.** सारध्वजिः ; **बाल.** सौरः .

८६ **मत्स्य.** नेतिष्यः ; **प्रद. बाल.** नैमिष्यः ; **जेबी.** नैकर्षिः .

८७ **मत्स्य.** लोलाक्षिः ; **संप्र.** लोष्ठाक्षिः, लोष्टाक्षिः ; **प्रद. संकौ.** लोष्ठाक्षिः ; **बाल.** लौगाक्षिः ; **जेबी.** उष्ट्राक्षिः .

८८ **मत्स्य.** चलकुण्डलः ; **गोप्र.** भवेरणिः ; **संप्र.** भवेरणिः, गवेरणिः ; **संकौ. संर.** गरेवणिः .

(२) **मत्स्य.** १९५।२८ ; **गोप्र.** ३१ ; **संप्र.** ६६४.

८९ **मत्स्य.** वाङ्गायनिः .

९० **गोप्र. संप्र.** स्वानुमतिः .

९१, ९२, ९३ **मत्स्य.** पूर्णिमागतिकोऽसकृत् ; **गोप्र.** पौर्णसौगन्धिकासिकृत् ; **संप्र.** पौर्णसौगन्धिकासिकृत् , पौर्णसौगन्धिः, काशकृत् ; **प्रद. बाल.** पौर्णसौगन्धिः, कान्तिकृत् ; **संकौ. संर.** पौर्णसौगन्धिः, काशकृत् .

९४ **मत्स्य.** सामान्येन यथा तेषां पञ्चैते प्रवरा मताः । ; **गोप्र.** सामान्यतस्तथैवैषां पञ्चार्षः प्रवरो मतः । ; **संप्र.** समध्यगस्तथैतेषां पञ्चार्षः प्रवरो मतः ।

(१) **मत्स्य.** १९५।२९ अप्नवान (आप्नुवान) ; **गोप्र.** ३१ ; **संप्र.** ६६४ अप्नवान (आप्नवान).

वत्सगणे संप्र. प्रद. संकौ. बाल. संर. एषु ग्रन्थेषु अधिकानि नामानि समुपलभ्यन्ते । तानि यथा—

१ **बिलभृत्**– **बाल.** विलभृत् ; **संर** विलभृत्.

२ **सौमदायनाः**— **प्रद. बाल.** सोमदायनः .

३ **वैरायणाः**— **प्रद. संकौ. बाल. संर.** (०).

४ **स्वानुमतयः**– सर्वग्रन्थेषु समानम् ।

५ **मण्डचित्राः**— **संप्र.** मण्डवित्राः .

६ **शौक्रायणाः**— सर्वग्रन्थेषु समानम् ।

७ **त्वाष्ट्रेयाः**— **बाल.** त्वाष्ट्रिः .

८ **कौवहुण्डयः**— **प्रद बाल.** कोचहुण्डिः ; **संकौ.** कोचहुण्डयः ; **संर.** कोवहुण्डयः .

९ **शौनायनाः**— सर्वग्रन्थेपु समानम् ।

१० **शाकपौर्णयः**– **प्रद. बाल.** शाकपूणिः ; **संर.** शाकपौणयः .

११ **व्रीहिमतयः**— **संप्र.** व्रीहमतयः ; **प्रद.** व्रीहमतिः ; **बाल.** व्रीहंमतिः .

१२ **मायामतिः**– **प्रद.** (०); **बाल.** मायामरिः .

१३ **आभ्रेवकिः**— **प्रद बाल.** (०); **संकौ.** राभ्रेवकिः ; **संर.** राभ्रेवकिः .

१४ **कोशनः**– **संप्र.** कौशनः , अशोकनः इत्यपि क्वचित् ; **बाल.** क्रोशनः .

१५ **मौद्गल्यः**— सर्वग्रन्थेषु समानम् ।

१६ **कारवचः**— **संकौ.** कारकारवचः .

१७ **सान्तपनायनाः**— **प्रद.** शान्तपायनः .

१८ **गेह्नः**— **संर.** गेह्निः .

१९ **सेलार्कः**— **संप्र. प्रद. संकौ. संर.** (०).

२० **भेह्निः**— **संप्र.** भेहिकि ; **प्रद.** भेह्ल ; **बाल.** भेह्लकः .

२१ **किरुषः**– **प्रद.** कितुषः ; **बाल.** सतुषः .

२२ **स्तन्वतः**– **संप्र.** तत्त्वतः ; **प्रद. बाल.** तत्त्वः .

२३ **औलन्धिः**– **संप्र.** औल्यन्धिः ; **प्रद.** औपधिः ; **बाल.** औलन्थिः .

२४ **वायर्गिराणिः**– **संप्र.** वारार्गिराणिः ; **प्रद.** वागर्गिराणिः ; **बाल.** वाटार्गिः, रागिः ; **संर.** वायर्गिरायणिः .

विदाः

१अतः परं प्रवक्ष्यामि शृणु त्वन्यान् भृगूद्वहान् ।
जमदग्निर्विदश्चैव पौलस्त्यो वैदभृत्तथा ॥

२ऋषिश्चाभयजातश्च कायनिः शार्कटायनः ।
और्वेया मारुताश्चैव सर्वेषां प्रवराः शुभाः ॥

३भृगुश्च च्यवनश्चैव अप्रवानस्तथैव च ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥

आर्ष्टिषेणाः

४भृग्वन्दीपो मार्गपथो ग्राम्यायनिकटायनी ।
आपस्तम्बिस्तथा भाल्विर्नैकर्षिः कपिरेव च ॥

२५ श्येनयागतिः– संप्र. श्येनपागतिः.

२६ नैकषिः– प्रद. बाल. (०) ; संर. नैकध्यिः .

२७ शौद्धकर्णिः– संर. शौककर्णिः .

२८ निडायनाः– प्रद. बाल. (०).

२९ श्रीवत्समण्डूकाः– प्रद. संकौ. बाल. संर. (०).

एतेषु कानिचिन्नामानि मानवश्रौतसूत्रे शुक्लयजुर्वेद-परिशिष्टे च पाठभेदेनोपलभ्यन्ते ।

(१) मत्स्य. १९५।३० ; गोप्र. ३१.

२ मत्स्य. बिदः .

४ मत्स्य. बैजभृत् ; गोप्र. वैजभृत् .

(२) मत्स्य. १९५।३१; गोप्र. ३१.

५ मत्स्य. उभयजातः ; गोप्र. भवजातः .

६ प्रद कटायनिः .

८ प्रद. आर्षेय. .

९ प्रद. मरुनः .

(३) मत्स्य. १९५।३२ अप्नवान (आप्नुवान) ; गोप्र. ३१–३२ ; संप्र. ६६४ मवैवाह्या (मविवाह्या).

(४) मत्स्य. १९५।३३; गोप्र. ३२; संप्र. ६६४.

१ मत्स्य. भृगुदामः ; गोप्र. संप्र. भृग्वन्दीयः .

३ मत्स्य. ग्राम्यायणि.

४ संप्र. रथायनी, चट्टायनिः ; प्रद. चटायनिः ; संकौ. चट्टायनिः ; संर. वदायनिः .

५ संप्र. आपस्तम्बः .

६ मत्स्य. बिल्विः ; गोप्र. भल्विः .

७ मत्स्य. नैकशिः ; गोप्र. नैकसिः .

८ गोप्र. कसिः ; संप्र. कविः, कपिः ; प्रद. संकौ. संर. कविः .

१आर्ष्टिषेणो गार्दभिश्च कार्दमायनिरेव च ।
आश्वायनिस्तथाऽनूपः पञ्चार्षेयाः प्रकीर्तिताः ॥

२भृगुश्च च्यवनश्चैव अप्रवानस्तथैव च ।
आर्ष्टिषेणस्तथाऽनूपः प्रवराः पञ्च कीर्तिताः ॥

३परस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥

यस्काः

४यस्कस्तथा वीतहव्यो माधूलश्चण्डमो दमः ॥

५जीवन्त्यायनिर्मौनश्च पिलिश्चैव खलिस्तथा ।
भागलिर्भागवित्तिश्च कौशाम्बेयिश्च काश्यपिः ॥

(१) मत्स्य. १९५।३४ ; गोप्र. ३२ ; संप्र. ६६४.

१२ गोप्र. आश्वाभिः ; संप्र. आश्वलायनिः, आश्वाभिः ; प्रद. आश्वायतिः ; संकौ. संर. आश्वभिः .

१३ मत्स्य. तथा रूपिः ; गोप्र. अधिनायिः च ; संप्र. अथानूपः, अधितापिः .

(२) मत्स्य. १९५।३५ अप्नवान (आप्नुवान) स्तथाऽनूपः (स्तथा रूपिः) ; गोप्र. ३२ स्तथाऽनूपः (स्तथाऽनूपिः) ; संप्र. ६६४ अप्नवान (आप्नवान).

(३) मत्स्य. १९५।३६ ; गोप्र. ३२ ; संप्र. ६६४ मवैवाह्या (मविवाह्या).

(४) मत्स्य. १९५।३६ ; गोप्र. ३२ ; संप्र. ६६४.

१,२ मत्स्य. यस्को वा वीतहव्यो वा ; गोप्र. यस्को वचो वीतहव्यो ; संप्र. यास्का वाचो वीतहव्याः .

३ मत्स्य. मथितः तु ; गोप्र. माधवः ; संप्र. मागन्धः .

४,५ मत्स्य. तथा दमः ; संप्र. प्रद. संर. चण्डमोदनः ; संकौ. चन्दुमोदनः .

(५) मत्स्य. १९५।३७ ; गोप्र. ३२ ; संप्र. ६६४.

६ मत्स्य. जैवन्त्यायनिः ; प्रद. जैवत्यायनः .

७ मत्स्य. मौञ्जश्च ; गोप्र. मौलिश्च ; संप्र. मौपिलिश्च ; प्रद. मौसलि.

८ संप्र. शालिः चैव, पिलिङ्खिलिः .

९ मत्स्य. चलिः. उपरितनं नाम द्रष्टव्यम् ।

१० मत्स्य. भागिलः ; गोप्र. भर्गलिः .

११ गोप्र. भार्गवत्विः च ; संप्र. गार्गवीतिः, भागवित्तिः ; संकौ. भागवतिः ; जेबी. भागविश्चयः .

१२ मत्स्य. कौशापिस्त्वथ.

१३ प्रद. कश्यपिः ; जेबी. वृकाश्वकिः .

१ बालेय[14]: समदागेयि[15]: सौरिर्ज्वरि[16]स्तथैव च ।
गार्गीय[17]स्त्वथ जाबालि[18]स्तथा पौष्णायनो[19] ह्यृषिः ॥

२ मोदायन[20]स्तथैतेषामार्षेयाः प्रवरा मताः ॥

३ भृगुश्च वीतहव्यश्च तथा चैव सवेदसः ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥

(१) **मत्स्य.** १९५।३८ ; **गोप्र.** ३२ ; **संप्र.** ६६४.

१४ **मत्स्य.** बालपिः ; **गोप्र.** बालेयिः ; **संप्र.** वासेयिः, वालेयिः ; **प्रद.** वालेयः ; **संकौ.** बालेपिः ; **संर.** (०).

१५ **मत्स्य.** श्रमदागेपिः ; **प्रद.** समदोगेयिः ; **संकौ. संर.** समदागपिः .

१६ **मत्स्य.** सौरस्थितिः ; **गोप्र.** सौज्वरिः च ; **प्रद. संकौ. संर.** सौरिः, ज्वरिः ; **जेबी.** दैर्घ्यचितः .

१७ **जेबी.** गौरिक्षितः .

१८ **संप्र. प्रद. संकौ. संर.** (०) ; **जेबी.** पञ्चालवः .

१९ **मत्स्य.** पौष्ण्यायनः ; **संप्र. प्रद. संकौ. संर.** (०) ; **जेबी.** पौष्णावतः .

(२) **मत्स्य.** १९५।३९ ; **गोप्र.** ३२.

२० **मत्स्य.** रामोदश्च ; **गोप्र.** ग्रामदश्च ; **संप्र. प्रद. संकौ. संर.** (०).

(३) **मत्स्य.** १९५।३९–४० ; पूर्वार्धे (भृगुश्च वीतिहव्यश्च तथा रवसवैवसौ); **गोप्र.** ३२ चैव सवेदसः (रवसवैवसौ) ; **संप्र.** ६६४ मवैवाह्या (मविवाह्या) उक्त.

यस्कगणे संप्र. प्रद. संकौ. संर. एषु ग्रन्थेषु अधिकानि नामानि समुपलभ्यन्ते । तानि यथा–

१ **भागन्तयः**– **प्रद.** भाङ्गतिः ; **संर.** भागान्तपः .

२ **सानुष्टयः**– **प्रद.** सानुष्टिः ; **संर.** सानुस्वयः .

३ **मादायनाः**– सर्वग्रन्थेषु समानम् ।

४ **शालङ्कायनाः**– ,, ,,

५ **तार्काः**– **संप्र.** तर्काः .

६ **प्रावारेयाः**– **प्रद.** प्रवारेयः ; **संकौ. संर.** प्रावरेयाः .

७ **शार्कराक्षिः**– सर्वग्रन्थेषु समानम् ।

८ **कौटिल्यः**– ,, ,,

९ **विलेभिः**– ,, ,,

१० **वाह्वयः**– **प्रद.** वाह्विः ; **संकौ.** वाह्नियः ; **संर.** वाह्वियः .

११ **हालेयः**– सर्वग्रन्थेषु समानम् ।

१२ **दीर्घचितः**– **प्रद.** दीर्घवित्तः ; **संकौ.** दीर्घचित्तः ; **संर.** दीर्घचित्ताः .

मित्रयुवः

१ खालायनि[1]: शाकटाक्षो[2] मैत्रेयः[3] सौख्र्य[4]स्तथा ॥
२ द्रौणायनो[5] रौक्ष्यायणा[6]पिशली चापिकायनिः ।
हंसजिह्वस्तथैतेषामार्षेयाः प्रवरा मताः ॥

३ भृगुश्चैवाथ वध्र्यश्वो दिवोदासस्तथैव च ।
परस्परमवैवाह्या ऋषयः परिकीर्तिताः ॥

१३ **सार्ष्टिः**– } **प्रद.** सार्ष्टिसावर्णी द्वावधिकावाश्व-
१४ **सावेतमः**– } लायनोक्तौ ; **संकौ. संर.** (०).

एतेषु कानिचिन्नामानि मानवश्रौतसूत्रे शुक्लयजुर्वेद-परिशिष्टे च पाठभेदेनोपलभ्यन्ते ।

(१) **मत्स्य.** १९५।४० ; **गोप्र.** ३२ .

१ **मत्स्य. गोप्र.** शालायनिः .

४ **मत्स्य. गोप्र.** खाण्डवः ; **प्रद.** सान्वयः .

(२) **मत्स्य.** १९५।४१ ; **गोप्र.** ३२ .

६ **मत्स्य.** रौक्मायणिः ; **गोप्र.** रौक्मायनः ; **प्रद.** रौक्थायनः .

७ **मत्स्य.** आपिशिः ; **गोप्र.** पिशली .

८ **गोप्र.** चापि कायनिः ; **प्रद.** आपिकायनः .

(३) **मत्स्य.** १९५।४२ ; **गोप्र.** ३२–३३ .

मित्रयुगणे (वाध्र्यश्वगणे) संप्र. प्रद. संकौ. संर. एषु ग्रन्थेषु अधिकानि नामानि समुपलभ्यन्ते । तानि यथा–

१ **रौप्यायणाः**– सर्वग्रन्थेषु समानम् ।

२ **रौक्मायणः**– **संप्र. संकौ. संर.** (०) .

३ **सापिण्डिनः**– **प्रद.** सात्यकिः ; **संकौ. संर.** सात्यण्डिनः .

४ **पिकाक्षाः**– **संकौ. संर.** पिण्डिकाक्षाः .

५ **मोदायनाः**– **संर.** मौदायनाः .

६ **कापिशायनाः**– सर्वग्रन्थेषु समानम् ।

७ **शाण्डेयाः**– **संर.** शाडेयाः .

८ **सक्षिताः**– **संकौ. संर.** साक्षिताः .

९ **मित्रयुजः**– **संर.** मित्रयतः .

१० **आपिशायनाः**– सर्वग्रन्थेषु समानम् ।

११ **पाटिकायनाः**– **प्रद.** (०) .

१२ **वाध्र्यश्वाः**– **संप्र.** माध्र्यश्वाः, वाध्र्यश्व इत्यपि क्वचित् ।

१३ **दिवोदासः**– **संर.** मित्रयुवो दिवोदासाः .

एतेषु कानिचिन्नामानि मानवश्रौतसूत्रे शुक्लयजुर्वेद-परिशिष्टे च पाठभेदेनोपलभ्यन्ते ।

शुनकाः

१शाक्त्यायनो यज्ञेपयो मत्स्यगैन्धिस्तथैव च ।
प्रत्यूर्षश्च श्रोत्रियश्च चौक्षिवै कार्दमायनिः ॥

२तथा गृत्समदो राजन् शुनकश्च महानृषिः ।
प्रवरास्तु तथोक्तानामार्षेयाः परिकीर्तिताः ॥

३भृगुर्गृत्समदश्चैव आर्षावेतौ प्रकीर्तितौ ।
परस्परमवैवाह्या इत्येते परिकीर्तिताः ॥

४एते तवोक्ता भृगुवंशजाता
महानुभावा नृप गोत्रकाराः ।
येषां तु नाम्नां परिकीर्तनेन
पापं समग्रं विजहाति जन्तुः ॥

(१) अथ इदानीमेतानि काण्डानि व्याख्यास्यामः । इहोदाहृतेषु गोत्रगणेष्वपि एकेन सूत्रकारेण अन्यैरनुक्तमधिकं यत्किञ्चित् गोत्रं वा गोत्रगणो वा गणान्तर्भूतानि वा गोत्रान्तराणि गोत्रसंख्या वा प्रवरे ऋषिक्रमविशेषो वा प्रवरविकल्पो वा तत्कृतौ विवाहाविवाहौ विशेषान्तरं वा (यदुक्तं) तत्सर्वं सर्वैः सूत्रकारैरुक्तमेवेति मन्तव्यं, प्रामाण्याविशेषादेकत्रोक्त्यैवार्थसिद्धेरविरोधाच्च, स्मृतिशास्त्रेषु प्रायश्चित्ताशौचदायविभागव्यवहारकाण्डेषु यद्वत् । तथा— गोत्रगणेषु परिगणितानामृषीणां नामधेयानि मात्रासंख्याक्रमेयत्तासंदेहात् संदिह्यमानरूपाणि निगमनिरुक्तव्याकरणमन्त्रार्थवादेतिहासपुराणलोकतर्केभ्यः सम्यगवधार्य तत्त्वतो यथाप्रश्नं विभजनीयानि । तथा— यत्रयत्रैव नामधेयमेकस्मिन्नेव गणे गणान्तरे वा द्विकृत्वस्त्रिकृत्वो वा पठितं, तत्रतत्र नामधेयैकत्वेऽपि तद्वाच्यस्यर्षेर्भेदोऽध्यवसातव्यः, अभेदे सति अभ्यासानर्थक्यात् एकस्मिन्नेव गणे, गणान्तरे च प्रवरभेदात् । न ह्येकस्यैव प्रवरभेदो युक्तो विना वचनेन । दृश्यते च लोके बहूनां पुरुषाणां एकमेव नामधेयं देवदत्तादिवत् । तथा यत्रयत्र एकर्षिनामधेयमेकस्मिन्नेव गणे अक्षरसंख्यामात्राक्रमाणामेकतमेनैकेन द्वाभ्यां वा विकृतं तेन सूत्रकारेण पठ्यते, तत्रतत्र नामैकदेशविकारेऽपि नामैकत्वात् नामवाच्यस्य चैकत्वं द्रष्टव्यम्, 'एकदेशविकृतमनन्यवद्भवति' इति न्यायात् । एकत्र एकप्रवरसत्त्वादन्यत्र तस्याध्याहारविपरिणामव्यत्यासव्यवहितकल्पनाभिः करणैः (?) सर्वाणि गोत्रकाण्डानि उक्तानि वक्ष्यमाणानि च समान्येवेति कृत्वा व्याख्यास्यामः ।

भृगूणामादितो व्याख्यास्याम इति । भृगोः प्राधान्यात् । प्राधान्यं च 'महर्षीणां भृगुरहम्' इति स्मृतेः, मोक्षधर्मेषु च भृगोर्वासुदेवांशतास्मरणात् । आदितो ये भृगवस्तान् वक्ष्यामः, न ह्यामुष्यायणत्वेन पश्चात् भृगुत्वमापन्नानिति दर्शयितुं वा, ह्यामुष्यायणानामुत्तरत्र वक्ष्यमाणत्वात् । इह गणाः प्रवराश्च निगदव्याख्याता इति न व्याख्येयाः । जामदग्न्यवत्सा इत्यत्र वत्सानां जमदग्निविशेषणं पञ्चावत्तप्रापणार्थम्, 'जमदग्नीनां पञ्चावत्तम्' इत्यापस्तम्बवचनात् । 'वत्सा विदा आर्ष्टिषेणा इत्येतेषामविवाहः । एते पञ्चावत्तिनः' इत्यत्र पञ्चावत्तविधिपरे सूत्रे पूर्वोक्तोऽविवाहश्चोन्नेय इति दर्शयति । इह वत्सादीनां त्रयाणां गणानां परस्परमविवाहः, पञ्चार्षेयत्वात् त्र्यार्षेयसंनिपाताच्च । ये च तत्र वैकल्पिकाः वत्सार्ष्टिषेणाः त्र्यार्षेयप्रवरास्तेषां परस्परमविवाहः, त्र्यार्षेयत्वात् द्व्यार्षेयसंनिपाताच्च । तदुक्तमधस्तात्— 'त्र्यार्षेयसंनिपातेऽविवाहः पञ्चार्षेयाणां द्व्यार्षेयसंनिपातेऽविवाहस्त्र्यार्षेयाणाम्' इति । अत्र श्लोकः— 'वत्सार्ष्टिषेणविदगोत्रभाजां पञ्चार्षेयप्रवरत्रये स्वे । भृग्वप्नवानच्यवनाः समाना यतस्ततो नास्ति मिथो विवाहः ॥' परेषां यस्कादीनां गणानां स्वस्वं

(१) मत्स्य. १९५।४३ ; गोप्र. ३३ ; संप्र. ६६४.
१ मत्स्य. गोप्र. एकायनः.
२ मत्स्य. गोप्र. यज्ञपतिः ; संप्र. यक्षपतिः.
३ मत्स्य. मत्स्यगन्धः.
४ मत्स्य. प्रत्यहः ; गोप्र. संप्र. प्रत्यूहः.
५ मत्स्य. तथा सौरिः ; गोप्र. तथा श्रोण्यः ; संप्र. तथा श्रौण्यः, श्रोण्याः ; प्रद. श्रोण्यः.
६ गोप्र. चक्षुर्वा ; संप्र. चाक्षिश्च.
(२) मत्स्य. १९५।४४ ; गोप्र. ३३ ; संप्र. ६६४.
९ मत्स्य. सनकः ; गोप्र. सनयश्च महर्षिकः ; संप्र. शुनकश्च महर्षिकः.
(३) मत्स्य. १९५।४५ ; गोप्र. ३३ ; संप्र. ६६५ उत्तरार्धे (परस्परमविवाह्या ऋषयः परिकीर्तिताः ।).
(४) मत्स्य. १९५।४६ येषां (एषां) ; गोप्र. ३३ विजहाति जन्तुः (पुरुषो जहाति) ; संप्र. ६६५ येषां (तेषां).

गणं समानप्रवरत्वाद्विहाय परस्परं पूर्वोक्तैर्वक्ष्यमाणैश्च सह विवाहोऽस्ति, सगोत्रत्वसमानप्रवरत्वयोरभावात् । इति भृगूणां विवाहाविवाहौ व्याख्यातौ ।

अत्र सूत्रकारैश्चत्वारः प्रवराः शुनकानामुक्ताः । एकस्तावत् शुनक इत्येकार्षेयः । गार्त्समद इत्येकार्षेयोऽपरः । भार्गव गार्त्समद इति द्व्यार्षेयोऽन्यः । भार्गव शौनकहोत्र गार्त्समद इति त्र्यार्षेयश्चतुर्थः । कथमेते प्रवरविकल्पा इति विचारयन्ति बहुविदः । तत्र व्रीहियवयोरिव विकल्पमेके मन्यन्ते । वंशव्यवस्थया व्यवस्थितविकल्पमपरे । कथं पुनरत्र वंशव्यवस्था ? अत्राहुः- चतुर्विधाः शुनकाः परस्परं भिन्नाः सन्ति । शुनकादेव जाताः केचित् । गृत्समदादेव जाताः केचित् । * केचिद् भृगोरपत्यं शुनकहोत्रः तदपत्यं गृत्समदः तस्मादेव जाता इति । तत्र शुनकनामधेयमात्रमेकं, वंशास्तु भिन्नाः । तेषां चतुर्विधानां शुनकानामिमे प्रवरा इति ।

ननु एवं कस्मान्न कल्प्यते- भृगोरपत्यं शुनकः, तदपत्यं शुनकहोत्रः, तदपत्यं गृत्समदः, तदपत्यं शुनकः § इत्येक एव वंश इति । नैवं युक्तम् । कुतः ? सत्याषाढवचनविरोधात् । तथाहि सत्याषाढो वदति- 'त्रीननन्तरानित ऊर्ध्वान् मन्त्रकृतोऽध्वर्युर्वृणीते, अमुतोऽर्वाचो होता' इति । अत्र अनन्तरानित्यस्यायमर्थो व्याख्यातो भाष्यकारेण मातृदत्तेन- 'मन्त्रदृग्भिरन्यैरव्यवहितान्' इति । तत्र एकवंशत्वे सति मन्त्रदृग्भिरेव व्यवधानं कल्पितं स्यात् । तस्मादुक्तो व्यवस्थितविकल्पः । एवं वक्ष्यमाणानामपि गर्गहरितकण्वरथीतरशाण्डिलादीनां वंशभेदकल्पनया प्रवरविकल्पा व्याख्येयाः । व्याख्याता भृगव इति उक्तानुभाषणस्य च प्रयोजनमविद्यमानभृगुशब्दानामपि शुनकमित्रयुवां भृगुत्वं यथा स्यादिति । तेन च प्रयोजनं 'भृगूणां त्वेति यथर्ष्याधानम्' 'भार्गवो होता भवति' इत्यादावुपप्रवेशसिद्धिरिति ।

ननु इह किमर्थं कात्यायनलौगाक्षी तत्रतत्र प्रतिगणं इत्येतेषामविवाह इति, न पुनरेकत्रैवाऽऽहतुः । असमानप्रवरैर्विवाह इति गौतमवदेकत्रैव युक्तं वक्तुम्, ग्रन्थलाघवात् । अत्र प्रवराध्यायसंप्रदायविदः परिहारमाहुः- मत्स्यपुराणे मत्स्यरूपं भगवन्तं विष्णुं तत्रतत्र गणानुक्त्वा प्रतिगणं 'एतेषामविवाहः' इति वदन्तं श्रुत्वा तत्संप्रदायात्कात्यायनलौगाक्षी तथैवाऽऽहतुरिति । अन्ये वदन्ति- बोधायनादिभिरन्यैः सूत्रकारैः समानगोत्राणामविवाह उक्तः, न समानप्रवराणामिति तद्दृढीकरणार्थं तत्रतत्राऽऽहतुरिति । अपरे वदन्ति- बहुकृत्वोऽपि तथा वेदितव्यमिति । तथाऽन्ये वदन्ति- सूत्रकारयोः शैली सेति । अवश्यमेव हि कस्यचित् काचिच्छैली भवति । यथा बोधायनः प्रथमकाण्ड एव 'इत ऊर्ध्वानध्वर्युर्वृणीतेऽमुतोऽर्वाचो होतेत्येष एवोभयोः सर्वत्रोद्देशः' इत्युक्त्वाऽपि तत्रतत्र प्रतिगणं 'होता, अध्वर्युः' इति वदति ग्रन्थगौरवभयं त्यक्त्वा । तथा च आपस्तम्बादयोऽपि एकार्षेयवसिष्ठशुनकादीनां प्रवरेष्वेव 'होता, अध्वर्युः' इति वदन्ति । तथा आश्वलायनः प्रवरमात्रमेव सर्वत्र वदति, नान्यत् किञ्चित् । तथा कात्यायनलौगाक्षी चेति । अपरे वदन्ति- यथा भिन्नगोत्रात्समानगोत्राः संनिकृष्टा इति कृत्वा तत्रतत्र विवाहे दोषा उक्तास्तथा सगोत्रादपि समान(गोत्रः ?) गणः संनिकृष्टतरः, एकर्ष्यपत्यत्वेन भ्रातृतुल्यत्वात्, तत्रतत्र विवाहे ततोऽपि गुरुतरो दोष इति दर्शयितुं तत्रतत्राऽऽहतुरिति । अपरे पण्डितम्मन्याः स्वमनीषया व्याचक्षते- एतेषामेवाविवाहोऽस्मिन् गणे, नान्येषामिति मत्वा तत्रतत्राऽऽहतुरिति । एवं तर्हि सूत्रकारयोः *श्रोत्रियत्वमापादितं स्यात् । कथम् ? तथा सति गणान्तरोक्तानां समानगोत्राणामपि सतां तस्मिन्नेव गणे विवाहप्रतिषेधो

---

* अत्र 'भृगोरपत्यं गृत्समदः, तस्मादेव जाताः केचित्' इत्ययं ग्रन्थस्त्रुटितः, अन्यथा प्रवरचतुष्ट्वोपपादकस्य वंशचतुष्टयस्यासंपत्तेः । प्रा. जॉन ब्रौ-महाशयेन तु यथाश्रुत एव ग्रन्थोऽनूदितः, नापि तत्र टिप्पणी विहिता ।

§ अत्र शुनकद्वयकल्पनं चिन्त्यं, 'भृगोरपत्य शुनकः, तदपत्यं शुनहोत्रः, तदपत्यं गृत्समदः' इति वा, 'भृगोरपत्य शुनहोत्रः, तदपत्य गृत्समदः, तदपत्य शुनकः' इति वा एकनैव शुनकेन अभिप्रेतार्थसिद्धेः । एकवंशत्वात् येनकेनाप्येकेनैव एतद्वंश्यानां 'शुनकाः' इति समाख्याऽपि सिध्यत्येव ।

* अत्र 'अश्रोत्रियत्वमापादितम्' इति वा, 'श्रोत्रियत्वं व्यापादितम्' इति वा भवितुं युक्तम् । अथवा 'आपादितम्' इत्यस्यैव 'व्यापादितम्' इत्यर्थो बोध्यः ।

न स्यात्। इष्यते च प्रतिषेधः। तस्माद्यथोक्त एवाभिप्राय इति। गोप्र. ३३–३६

(२) इदानीं गोत्राणि तद्गणाश्च संख्याविशेषविशिष्टास्तथा तत्प्रवराश्च स्वरूपतत्संख्याविकल्पविशिष्टा निरूप्यन्ते।

ननु– गोत्रप्रवराणां शाखोपशाखाभेदेनानन्त्यात् बौधायनापस्तम्बकात्यायनाश्वलायनकल्पसूत्रमत्स्यपुराणादिषु च एकत्राश्रुतानामपि अन्यत्र श्रवणात् आनन्त्यावगमात् तत्तन्महर्षिगणान्तर्गतानां गोत्राणां प्रवराणामपि स्वरूपक्रमविशेषेषु गोत्रप्रवरऋषिनामधेयवर्णेषु च संवादाभावाच्च अशक्यं सामस्त्येन निरूपणम्– इति चेत्, न, ‘ गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च। ऊनपञ्चाशदेवैषां प्रवरा ऋषिदर्शनात् ॥ ’ इति बौधायनोक्तप्रवरसंख्यानुसारेणैव निरूपणात्। अत एव स्मृत्यर्थसारकृता बौधायनानुसरणमेव कृतम्– ‘ मुनिप्रणीतप्रवरैरूनपञ्चाशता वयम्। अनन्तान्यपि गोत्राणि वर्गीकृत्याभिदध्महे॥ ’ इत्यादिना। बौधायनवाक्यस्यार्थो मञ्जर्यां कृतः– दशगुणितं सहस्रं अयुतमुच्यते। दशगुणितं अयुतं लक्षात्मकं नियुतमुच्यते। दशगुणितं नियुतं प्रयुतमुच्यते। दशगुणितं प्रयुतं अर्बुदं कोट्यपरपर्यायमुच्यते। सहस्रप्रयुतार्बुदशब्देषु बहुत्वविशेषविवक्षायां त्रिष्वपि त्रिगुणीकृतेषु तदर्थेषु गोत्राणां तिस्रः कोटिसंख्या भवन्ति। तदविवक्षायां पुनरधिकान्यपि तानि भविष्यन्तीति कियत्यः कोटिसंख्या इति नावधारयितुं शक्यते। अत्र संख्याविवक्षायां गोत्राणां सान्तत्वेऽपि अनन्तानीत्यभ्युपेत्यवादतया अपिशब्दो व्याख्येयः। मुनिप्रणीतेत्यनेन ऋषिदर्शनात् इत्यस्यार्थ उक्तः। ततश्च यद्यपि अपत्यापत्यवद्भावेन साक्षात्परंपरयाऽवस्थितेषु ऋषिषु एतानि एतावन्ति च गोत्राणि, एते एतावन्तश्च प्रवरा इति विवेकेन शीघ्रं निरूपयितुं न शक्यन्ते, तथापि प्रवराध्यायकर्तृभिर्ऋषिभिर्ये प्रणीताः प्रणयनेन नियमिताः ऊनपञ्चाशत्संख्यया भार्गवादिरूपेण स्वरूपविशेषतश्च परिच्छिन्नाः प्रवराः, तैर्वर्गीकृत्य अवान्तरभेदभिन्नानि कृत्वा अनन्तान्यपि गोत्राणि अभिदध्महे इति स्मृत्यर्थसारवचनस्यार्थः। वर्गाः वंशा गणा इति पर्यायाः। ननु– प्रवराणां ऊनपञ्चाशत्त्वं न नामतो नियन्तुं शक्यम्, अष्टनवतिसंख्यया आश्वलायनेन प्रतिपादनात्, आपस्तम्बकात्यायनसत्याषाढादिभिः न्यूनाधिकसंज्ञाभिरपि अभिधानात्– इति चेत्, नैष दोषः। बौधायनक्रममाश्रित्यैव ऊनपञ्चाशदिति संख्योच्यते। तत्क्रमे च वक्ष्यमाणगणानां मध्ये तत्तद्गणे व्रियमाणत्वेन समुदायीकृत्योक्तानां प्रवराणां तादृशान् समुदायानाश्रित्येति अन्यत्र गणानां न्यूनाधिकसंख्ययाऽभिधानेऽपि न काचित् क्षतिरिति बहवः। अस्माभिस्तु आश्वलायनादिप्रणीतानां सर्वेषामपि गोत्रप्रवरनिबन्धनानां प्रामाण्याविशेषात् प्रसिद्ध्यविशेषाच्च बौधायनेन अनुक्तमपि क्वचित्क्वचित् गोत्रतद्गणप्रवरविकल्पादिकं आश्वलायनादिसूत्रान्तराद्युक्तोपसंहारेण (गोत्राणि प्रवराश्चोच्यन्ते ?) उच्यते।

तत्र पूर्वं भृगुगणाङ्गिरोगणौ महागणौ निरूप्येते। तत्र भृगवो द्विविधाः, जामदग्न्या अजामदग्न्याश्च। तत्र जामदग्न्येषु वत्सविदौ द्वौ गणौ। द्वितीये तु पञ्च गणाः। ते च आर्ष्टिषेणाः यस्काः मित्रयुवो वैन्याः शुनका इति। एते एव केवलभृगव इति व्यवह्रियन्ते। तत्र अस्मिन् गणसप्तके पञ्चार्षेयं गणत्रयं, ततस्त्र्यार्षेयं गणत्रयं, तत एक एकार्षेयः। पृ. ६१५–६१६

तत्र ये जामदग्न्या वत्सास्तेषां पञ्चार्षेयः प्रवरः। अजामदग्न्यानां वत्सानां त्र्यार्षेय एव भार्गव च्यावन आप्नवानेति। पृ. ६१८

द्विविधा * अप्येते विदा जामदग्न्या एव, पञ्चार्षेयेष्वपि और्वशब्दसमन्वयात् जमदग्नेः सत्तयाऽनुवृत्तिप्रतीतेः, तस्य जामदग्न्येष्वेव दृष्टत्वात्। तथा च ‘ और्वजामदग्न्यशब्दौ जामदग्न्यत्वप्रयुक्तौ ’ इत्याश्वलायनसूत्रवृत्तिकारेणोक्तम्।

वत्सविदार्ष्टिषेणान परस्परमविवाहः। कुतः ? पञ्चार्षेयाणां भार्गवच्यावनाप्नवानेति त्र्यार्षेयसाम्यात्, त्र्यार्षेयाणां द्व्यार्षेयसाम्यात्। वत्सविदयोर्जामदग्न्यत्वेन सगोत्रत्वात् पञ्चप्रवरे त्रिप्रवरसाम्येन च न विवाहः। तत्रागस्त्याष्टमसप्तर्षेर्जमदग्नेः वत्सेषु व्रियमाणतयाऽनुवृत्तेः,

* पञ्चार्षेयप्रवरास्त्र्यार्षेयप्रवराश्च।

जमदग्निमुपक्रम्य विदानामप्युक्तत्वात् सत्तया तस्यैवानुवृत्तेः तेषां सगोत्रत्वम् । ननु– वत्सविदाभ्यामार्ष्टिषेणस्यानुद्वाहनिमित्तं न सगोत्रत्वम्, अस्याजामदग्न्यत्वात् । नापि प्रवरसाम्यम्, वत्सविदयोर्भार्गवौर्वजामदग्न्येति, आर्ष्टिषेणानां भार्गवार्ष्टिषेणानूपेति त्रिप्रवरपक्षे भेदादिति चेत् न, 'वत्सा विदा आर्ष्टिषेणा इत्येतेषामविवाहः' इति बौधायनोक्तेः । अजामदग्न्यत्वेऽप्येषाम् 'एते पञ्चावत्तिनः' इति बौधायनोक्त्यैव पञ्चावत्तिनो भवन्ति । यस्तु आर्ष्टिषेणेष्वपि केषांचित् जामदग्न्यत्वव्यवहारः, स पञ्चावत्तित्वसाम्यादविवाहसाम्याच्च । न त्वेषां वस्तुतस्तत्त्वम्, तथात्वे मानाभावात् । स्वे स्वे गणे सर्वत्राविवाह इति स्पष्टमेवेति न विचारार्हम् ।

पृ. ६१९–६२०

अत्र केचित्– शुनकानां जनकभेदेन चतुर्विधत्वात् तत्तच्छुनकवंश्यानां तत्तत्प्रवरकल्प इत्येवं व्यवस्थितविकल्प इति । शुनकादेवोत्पन्नाः केचित्, गृत्समदादेव केचित्, भृगोरपत्यं गृत्समदः, तस्मादेव केचित्, भृगोरपत्यं शुनहोत्रः, तदपत्यं गृत्समदः, तस्मादेव केचित् इति । तत्र शुनकनामधेयमात्रं एकम्, वंशास्तु भिन्ना एव । नन्वेवं भृगोरपत्यं शुनकः, तदपत्यं शुनहोत्रः, तदपत्यं गृत्समदः, तदपत्यं शुनकः इत्येक एव वंशः कस्मान्न कल्प्यते । नैतत् सुष्ठूच्यते । सत्याषाढवचनविरोधात् । तथाहि– सत्याषाढो वदति–' त्रीननन्तरानत ऊर्ध्वान् मन्त्रकृतोऽध्वर्युर्वृणीते, अमुतोऽर्वाञ्चो होता ' इति । अत्र अनन्तरानित्यस्य अयमर्थो व्याख्यातो भाष्यकारेण मातृदत्तेन–' मन्त्रदृग्भिः अन्यैः अव्यवहितान् ' इति । तत्र एकवंशत्वे सति मन्त्रदृग्भिरेव व्यवधानं कल्पितं स्यात् । तस्माद्युक्तो व्यवस्थितविकल्पः । एवं वक्ष्यमाणानामपि गर्गहरितकण्वरथीतरशाण्डिल्यादीनां वंशभेदकल्पनया प्रवरविकल्पा व्याख्येया इति ।

तदसत् । तत्र हि वंशभेदः कल्प्यते, यत्र अनादिपरंपरया अविगीता स्मृतिः । यथा वत्सानां ' वयं जामदग्न्या वत्साः, वयं अजामदग्न्याः ' इति । नैवं शुनकेषु तादृशी स्मृतिरस्ति । न च प्रवरभेद एव तत्कल्पकः, तस्य प्रयोगभेदादेवोपपत्तेः व्रीहियवयोरिव । न च तत्कल्पकमन्यत्प्रमाणमस्ति । तस्मात् अव्यवस्थित एवायं विकल्प इति वृत्तिकारः । इदानींतनेषु तु पूर्वपूर्वपरिग्रहवशात् व्यवस्था युक्ता । एतेन सर्वे विकल्पा व्याख्याताः ।

एते चत्वारोऽपि भिन्नगोत्राः स्वस्वगणे सगोत्राः सर्वप्रवरसाम्यादविवाह्याः । प्रवरविकल्पेऽपि एकत्र द्विप्रवरसाम्यं सर्वत्राविवाहप्रयोजकम् । विकल्पाभिधायिभिरपि कात्यायनादिभिरेतेषां अविवाह इत्युक्तत्वाच्च । अत एव साम्यात् एवंजातीयकेष्वपि गोत्रत्वप्रसिद्धिर्लौकिकानाम् ।

वैदविश्वज्योतिषां त्र्यार्षेयः प्रवरः, भार्गववैदविश्वज्योतिषेति । शाठरमाठराणां त्र्यार्षेयः प्रवरः, भार्गवशाठरमाठरेति । क्वचिदेतद्गणद्वयम् । इति बौधायनोक्तो भृगुगणनिर्णयः । संप्र. ६२२–६२३

प्रवरसंग्रहकारः

जामदग्न्यो वीतहव्यो वैन्यो गृत्समदाह्वयः ।
वाध्र्यश्वो गौतमाख्यश्च भरद्वाजाह्वयः कपिः ॥
हारीतो मौद्गल्यकण्वौ विरूपो विष्णुवृद्धकः ।
अत्रिर्विश्वामित्रकश्च वसिष्ठः कश्यपाह्वयः ।
अगस्त्यश्चेति मुनयो ह्यष्टादश गणाः स्मृताः ॥

जामदग्न्याः

जामदग्न्यश्च वत्सश्च श्रीवत्सश्च्यवनाह्वयः ।
आप्नवानौर्वसावर्णिजीवन्ता देवरातकः ॥

(१) **प्रपा.** ३०९ माख्यश्च (माख्योऽपि) ; **विपा.** ७०१ वैन्यो (वैण्यो) उत्तरार्धे (वाध्र्यश्वो गौतमश्चैव भरद्वाजः कपिस्तथा ।) ; **ज्योनि.** १३३ ; **बाल.** १।५३ पृ. १७६ ; **संग.** १७७.

(२) **प्रपा.** ३०९ प्रथमार्धे (हारीतः कण्वो मौद्गल्यो विरूपो विष्णुवर्धकः ।) ; **विपा.** ७०२ अत्रिर्विश्वामित्रकश्च (अत्रिर्विश्वामित्रकौ च) ; **ज्योनि.** १३३ प्रथमार्धे (हरितो मौद्गलः कण्वो विरूपो विष्णुवृद्धकः ।) अत्रिर्विश्वामित्रकश्च (अत्रिविश्वामित्रकौ च) ; **बाल.** १।५३ पृ. १७६ हारीतो (हरितो) अत्रिर्विश्वामित्रकश्च (अत्रिविश्वामित्रकौ च) ; **संग.** १७७–१७८ मौद्गल्यकण्वौ (मौद्गलः काण्वो) मित्रकश्च (मित्रः कौत्सो).

(३) **प्रपा.** ३०९ जामदग्न्यश्च वत्सश्च (जामदग्न्यश्चतत्सश्च) सावर्णिजीवन्ता (सावर्णिजीवन्तो); **विपा.** ७०२ जीवन्ता

[1]वीतशायनशाखाख्यौ वैरोहित्योऽवटाह्वयः ।
मण्डुः प्राचीनयोग्यः स्यादार्ष्टिषेणस्त्वनूपकः ॥
[2]एतानि भार्गवाख्यानि दश सप्तोत्तराणि च ।
जामदग्न्यगणे त्वस्मिन्न विवाहः परस्परम् ॥

वीतहव्याः (यस्काः)

[3]वीतहव्या यस्कमौनमौकवाधूलसंज्ञकाः ।
सावेतसः षडेतानि भार्गवाख्यो ह्ययं गणः ॥
[4]वीतहव्यस्य चान्योन्यं न कार्यं पाणिपीडनम् ॥

वैन्याः

[5]वैन्यः पार्थश्च गोत्रे द्वे भवतो, भार्गवाह्वयः ।
एष वैन्यगणस्तस्मिन्न चान्योन्यं करग्रहः ॥

गृत्समदाः (शुनकाः)

[1]उभे गोत्रे गृत्समदः शौनको भार्गवाह्वयः ।
गणे गृत्समदे तस्मिन् नान्योन्यं पाणिपीडनम् ॥

वाध्य्रश्वाः (मित्रयुवः)

[2]वाध्य्रश्वो मित्रयुश्चैव गोत्रे भार्गवनामकौ ।
वाध्य्रश्वस्य गणस्तस्मिन्नुद्वाहो न परस्परम् ॥
[3]जामदग्न्यादयः पञ्च गणा भृगुगणाः स्मृताः ।
तथाप्येषां गणानां तु विवाहः स्यात्परस्परम् ॥
[4]जमदग्निगणस्यापि विश्वामित्रगणस्य च ।
न देवरातगोत्रेण विवाहः स्यात् परस्परम् ॥

स्मृत्यर्थसारः

[5]मुनिप्रणितप्रवरैरूनपञ्चाशता वयम् ।
अनन्तान्यपि गोत्राणि वर्गीकृत्याभिदध्महे ॥

(जीवन्तो); **ज्योनि.** १३३ सावर्णिजीवन्ता (सावर्णी जीवन्तो) ; **बाल.** १।५३ पृ. १७७ ज्योनिवत् ; **संग.** १७८ सावार्णिजीवन्ता (सावर्णिर्जीवन्तो).

(१) **प्रपा.** ३०९ पूर्वार्धे (वीतशौर्यश्च शाखाख्यो वैरोहितवटाह्वयः) मण्डुः (मन्दू); **विपा.** ७०२ शाखाख्यौ (शाखाख्यो) त्योऽवटा (त्यो वटा) मण्डुः (मन्तुः) ; **ज्योनि.** १३३ पूर्वार्धे (शीतशायनशाखाख्यो वैरोहित्यो वटाह्वयः।) मण्डुः (मण्डः) स्त्वनूपकः (रत्वरूपकः); **बाल.** १।५३ पृ. १७७ पूर्वार्धे (वीतस्सायनशाखाख्यो वैरोहित्यो वटाह्वयः) स्यादार्ष्टि (स्यादर्ष्टि) ; **संग.** १७८ पूर्वार्धं विपावत्, मण्डुः (मण्डः).

(२) **प्रपा.** ३०९ त्वस्मिन्न (तस्मिन्न); **विपा.** ७०२ ; **ज्योनि.** १३३ प्रपावत्; **बाल.** १।५३ पृ. १७७ प्रपावत्; **संग.** १७८ प्रपावत्.

(३) **प्रपा.** ३०९ (वीतहव्या मौनमौकावपि वाधूलसंज्ञकाः । सावेदश्च षडेतानि भार्गवाख्यान्वये गणाः ॥) ; **विपा.** ७०२ वीतहव्या यस्क (वीतहव्यो यास्क) ख्यो ह्ययं (ख्यान्वयो) ; **ज्योनि.** १३३ (वीतहव्ययस्कमौनमौकवाधूलसंज्ञकाः । सावेदश्च षडेतानि भार्गवाख्यान्वये गणः ॥) ; **बाल.** १।५३ पृ. १७७ सावेतसः (सावेदश्च) ; **संग.** १७८ पूर्वार्धं विपावत् , ख्यो ह्ययं (ख्यान्वये).

(४) **प्रपा.** ३०९ ; **विपा.** ७०२ ; **ज्योनि.** १३३ चान्योन्यं (वाऽन्योन्यं) ; **बाल.** १।५३ पृ. १७७; **संग.** १७८.

(५) **प्रपा.** ३०९ भार्गवाह्वयः (भार्गवाह्वकौ) उत्तरार्धे (एष वैन्यगणस्तत्र ह्यन्योन्यं न करग्रहः।); **विपा.** ७०२ वैन्यः (वैण्यः) उत्तरार्धे (एष वैण्यगणस्तत्र नान्योन्यं वै करग्रहः ।); **ज्योनि.** १३३ उत्तरार्धे (एष वैन्यगणस्तत्र अन्योन्यं न करग्रहः ।) ; **बाल.** १।५३ पृ. १७७ भार्गवाह्वयः (भार्गवाह्वकः) ; **संग.** १७८ उत्तरार्धे (एष वैन्यगणस्तत्र नान्योन्यं च करग्रहः ।) .

(१) **प्रपा.** ३०९ ; **विपा.** ७०२ तस्मिन् (चास्मिन्) ; **ज्योनि.** १३३ गणे गृत्समदे (गणो गृत्समदः) ; **बाल.** १।५३ पृ. १७७ भार्गवाह्वयः (भार्गवाह्वकः) ; **संग.** १७८ उभे गोत्रे (उभगो वै) .

(२) **प्रपा.** ३०९ पूर्वार्धे (वाध्य्रश्वो मित्रयुतो वै गोत्रे भार्गवनामकः ।) ; **विपा.** ७०२–७०३ गोत्रे (उभौ) ; **ज्योनि.** १३३ पूर्वार्धे (द्वे वाध्य्रश्वो मित्रयुग्मो गोत्रे भार्गवनामकः ।) ; **बाल.** १।५३ पृ. १७७ पूर्वार्धे (द्वे वाध्य्रश्वो मित्रयुग्यो गोत्रे भार्गवनामकः ।); **संग.** १७८ मित्रयुश्चैव गोत्रे (मित्रयुक्चैव उभौ) गणस्त (गणे त).

(३) **प्रपा.** ३०९ तथाप्येषां (न चाप्येषां) ; **विपा.** ७०३ ; **ज्योनि.** १३३ तथाप्येषां (न चैतेषां) ; **बाल.** १।५३ पृ. १७७ प्रपावत् ; **संग.** १७८.

(४) **प्रपा.** ३१० (विश्वामित्रा जामदग्न्या दैवरातविवर्जिताः । परस्परं विवाह्याः स्युः सर्वत्रेति विनिश्चयः ॥) ; **संप्र.** ६५४ प्रयोगपारिजाते इत्युक्तम् ; **चम.** १०६ (=) ; **संम.** ६१ प्रयोगपारिजाते संग्रहे इति ; **प्रद.** १२९ प्रयोगपारिजाते यथा संग्रहे इति ; **विपा.** ७०६ ; **ज्योनि.** १३४ ; **प्रका.** ३४९ ; **बाल.** १।५३ पृ. १७८, १८८ : १८६ (देवराता विवाह्याः स्युः सर्वत्रेति च संमताः । विश्वामित्रान् जामदग्न्यान् वर्जयित्वा ततोऽन्यतः ॥) कृष्णीये इत्युक्तम् ; **संग.** १८१ पू. ; **कृभ.** १०५१ (=) ; **संर.** ४४९.

(५) **स्मृसार.** १५ ; **संप्र.** ६१५ ; **संम.** ६२ वर्गीकृ (चाङ्गीकृ).

जामदग्न्यौ वत्सविदावार्ष्टिषेणाः परस्परम् ।
नान्वियुः प्रवरैक्येन सगोत्रत्वेन चादिमौ ॥
यस्का मित्रयवो वैन्याः शुनकाः प्रवरैक्यतः ।
स्वं स्वं हित्वा गणं सर्वे विवहेयुः परावरैः ॥
उक्ताः सप्त भृगोर्वंशाः ॥

मण्डनः

जमदग्निर्भरद्वाजो विश्वामित्रोऽत्रिगौतमौ ।
वसिष्ठः कश्यपोऽगस्तिरेषां येष्वनुवर्तनम् ।
येषां तुल्यर्षिभूयस्त्वं नोद्वहन्ति मिथश्च ते ॥

एषामष्टानां एकस्यापि येषु प्रवरेष्वनुवर्तनं साम्यं, येषां प्रवराणां त्र्यार्षे द्वयोः पञ्चार्षे त्रयाणामैक्यं तत्राविवाहः स्फुट एव । निप्र. २७७

(१) स्मृसार. १५ जामदग्न्यौ (जामदग्न्या); चम. १०० (=); संम. ६२; कृभ. १०३७ (=).

(२) स्मृसार. १५; चम. १०१ (=) यस्का (यास्का); संम. ६२ मित्रयवो (मित्रयुवो); संकौ. १८५ मित्रयवो वैन्याः (मित्रयुवो वेन्याः); कृभ. १०३८; संर. ४३१ संमवत्.

(३) स्मृसार. १५; संम. ६२.

(४) निप्र. २७७ मिथश्च ते (मिथस्ततः); संर. ४३१.

भृगूणां वीतहव्यात्प्राग्विवाहो न परस्परम् ।
वीतहव्यादयः स्वं स्वं गणं हित्वा परावरैः ॥
विवाहं कुर्वते सर्वे तेभ्यः प्राक्पठिता अपि ।
लौगाक्षीणां दिवोदासा वीतहव्याः सधर्मिणः ॥

अनिर्दिष्टकर्तृकवचनानि

भृगूणां न विवाहोऽस्ति चतुर्णामादितो मिथः ।
श्यैतादयस्त्रयस्तेषां विवाहो मिथ इष्यते ॥
भृग्वङ्गिरोऽन्यं (न्यद्) यत्किंचिद्दषेर्योवस्तु वर्तनम् ।
तावत्समानगोत्रत्वमिति केचित्समूचिरे ॥
तन्नैवं सति सर्वत्र सगोत्रत्वनिबन्धने ।
अनुद्वाहे तु कुत्र स्यात्प्रवरैक्यं प्रयोजकम् ? ॥
कौत्यायनेन तु गणा भृगोर्द्वादश कीर्तिताः ।
जामदग्न्याश्चतुर्भेदास्तथैवाजामदग्न्यकाः ॥
वात्स्यायना अवात्स्याश्च बैजवाः शाव (ठ)- रादिकाः ।
बिदार्ष्टिषेणा वत्सादि वेदविश्वादयस्तथा ।
पार्थश्यैता आपिशला वीतहव्याहृवगृत्समाः ॥

(१) संर. ४३१. (२) विपा. ७१४.
(३) कृभ. १०३०. (४) कृभ. १०३९.

गौतमकाण्डम्

[अङ्गिरसस्त्रिविधाः— गौतमाः भरद्वाजाः केवलाङ्गिरसश्चेति ।]

बौधायनश्रौतसूत्रम्

आयास्याः

अङ्गिरसो व्याख्यास्यामः—
१ आयास्याः २ श्रोणीवेधाः ३ काचाक्षयः ४ मूढरथाः ५ सात्यकयः ६ तौडेयाः ७ कौमारवत्याः ८ तौडिः ९ दार्भिः १० देवकिः ११ सात्य-

(१) बौश्रौप्र.; गोप्र. ३६; संप्र. ६२६–६२७; संम. ५८; प्रद. ११४; संकौ. १८५–१८६; संर. ४३१–४३२.

२ बौश्रौप्र. आणीवेयाः; गोप्र. संप्र. आणिवेयाः; संम. आणिवेयाः; प्रद. श्रोणीवेषकः; संकौ. संर. श्रोणिवेधाः.

३ संम. कावाक्षयः; प्रद. वाक्षिः; संकौ. संर. (०).

४ बौश्रौप्र. मूढाः.

५ गोप्र. प्रद. संकौ. संर. सत्यकयः; संप्र. संम. (०).

६ बौश्रौप्र. तैदेहाः; गोप्र. स्वैदाहाः; संप्र. प्रद. संकौ. स्वैदेहाः; संम. संर. वैदेहाः.

७ गोप्र. कौमाश्वत्याः.

८,९ गोप्र. तौडिः दर्भिः; संप्र. ताडिः तौडेत्यपि कचित्, दर्भिः; संम. प्रद. ताण्डिः, दर्भिः; संकौ. तौडन्दर्भिः; संर. तौण्डदर्भिः; जेबी. तौण्डिः, दार्भिः.

१० संकौ. संर. दैवकिः.

११ गोप्र. सात्यकः; संप्र. सात्यमुग्रिकः; प्रद. सात्यमुग्रीकः.